॥ वैदिकसाहित्यपरिचयः ॥

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

।। वैदिकसाहित्यपरिचयः।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रो. पङ्कज एल. जानीजीमहाभागाः

*

लेखकः

डॉ. भावप्रकाशः एम. गांधी

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३

प्रतयः - ३००

मूल्यम् - १००/-

ISBN -13-078-81-925721-0-9

मुद्रकः -

एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथसंस्कृत-विश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। साम्प्रतकाले वेदानामध्ययनस्य महती आवश्यकता वर्तते। आधुनिकजनः वेदात् वैदिकसाहित्याच्च अनभिज्ञः वर्तते। तदर्थं महता परिश्रमेण **डॉ. भावप्रकाशगांधीमहोदयेन** अयं वैदिकसाहित्यपरिचयात्मकः ग्रन्थः लिखितः। मन्ये अयं ग्रन्थः शोधछात्राणां वेदजिज्ञासूनां च कृते महते उपकाराय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. पङ्कज एल. जानी

कुलपतिः

।। समर्पणम् ।।

येषां प्रेम्णा प्रेरणया आशीर्वचोभिश्च
वेदवेदाङ्गज्ञानस्यावसरोऽधिगतः
तयोः प्रथमगुर्वोः मातृपितृकरकमलयोः
पुस्तकपुष्पमिदं
सादरमुपायनीक्रियते ।।

॥ पुरोवाक् ॥

विश्वस्य सम्पूर्णसाहित्ये वैदिकसाहित्यं सर्वप्राचीनं सर्वसमृद्धञ्च वरिवर्ति इत्यत्र नास्ति सन्देहलेशमात्रमपि। आप्राचीनादेव कालाद् वैदिकीसंस्कृतिः वैदिकं वाङ्मयञ्च भारतस्य गौरवं दिक्षु प्रसारयत् चकास्तितराम् । भारतीयसंस्कृतेर्मूलस्त्रोतांसि इमे वेदाः वैदिकसाहित्यञ्चास्ति। यथा शरत्यागाय धनुषः प्रत्यञ्चा पृष्ठे कर्षणीया भवति, तथैवा-स्माकं संस्कृतेर्सभ्यतायाः ज्ञानाय वेदान् प्रति गन्तव्यमेव भविष्यति। जगति विद्यमानानां सर्वासां प्रवृत्तीनामाश्रयो वेदः विद्यते। अत एव महाभारते महर्षिव्यासेन समुदीर्यते -

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः॥

प्रस्तुते ग्रन्थे मुख्यतः एतेषां सर्वज्ञानमयानां वेदानां महत्त्वं, समयनिर्धारणम्, उत्पत्ति-विषयकं सर्वविधं वर्णनं सप्रमाणं प्रस्तुतम्। तेन सहैव ब्राह्मणग्रन्थानाम्, आरण्यकानाम्, उपनिषदां, वेदाङ्गानाञ्च संक्षेपेण परिचयः प्रदत्तः।

मन्ये पुस्तकमिदं शोधच्छात्राणां, वेदजिज्ञासूनाम् तथा उच्चशिक्षणक्षेत्रे अध्येतॄणां कृते महदुपकारकं भविष्यति। लाघवं संस्कृतस्य वैशिष्ट्यं वर्तते अतः 'कुम्भे अर्णवनिपातः' इति न्यायेन न्यूनशब्देषु विस्तृतवर्णनं कर्तुं मया ग्रन्थे प्रयासो विहितः उच्चस्तरीयपाठ्यक्रमेऽपि वैदिकसाहित्यविषयकं प्रश्नपत्रं भवति अत आशासे तेऽपि एतस्मात् ग्रन्थात् लाभार्हाः भविष्यन्ति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिवर्येभ्यः प्रो. वेम्पटि कुटुम्बशास्त्रीमहाभागेभ्यः कृतज्ञताज्ञापनमावश्यकं मन्ये येषां प्रेरणया पुस्तकमिदं प्रकाश्यते। अनुस्नातकविभागस्य अध्यक्षेभ्यः प्रो. देवेन्द्रनाथ पाण्डेयजीमहोदयेभ्यः तथा युनिवर्सिटी सञ्चालितसंस्कृतमहाविद्यालयस्य प्राचार्येभ्यः डॉ. नरेन्द्रकुमार एल. पण्ड्याजीमहोदयेभ्यः धन्यवादान् निवेदयामि येषां मार्गदर्शनं प्रतिपदं मयाऽवाप्तम्।

अन्ते च सर्वेषां वेदार्णवगाहननिपुणानां विदूषां, गुरूवर्याणां, पित्रोः, परमात्मनश्च भूयोभूयः अहैतुकीमनुकम्पां स्मारं स्मारं कृतज्ञतां च ज्ञापयन् विद्वद्वरेण्यानां करकमलेषु ग्रन्थोऽयं सादरं समर्प्यते।

डॉ. भावप्रकाशः एम. गांधी
साहित्यशास्त्रविभागः, अनुस्नातकभवनम्
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

॥ अनुक्रमणिका ॥

वैदिकसाहित्यपरिचयः

वैदिकसाहित्यस्य परिचयः

वेदानां महत्त्वम्

यथा प्राचीनासु सर्वासु भाषासु संस्कृतं दैवी वाक् सर्वातिशायि वर्वर्ति तथैव सर्वेषु वाङ्मयेषु वैदिकवाङ्मयं सर्वोत्कृष्टं प्रामाणिकञ्च स्वीक्रियते जोघुष्यते च सर्वैरपि सुधीभिः विद्वद्भिश्च । आप्राचीनादेव कालात् वैदिकी संस्कृतिः वैदिकं वाङ्मयञ्च भारतवर्षस्य गौरवं दिक्षु प्रसारयत् चकास्तितराम् । यदि भारतीयसंस्कृतेर्मूलस्रोतोऽनुसन्धीयते तर्हि वेदाः एव तन्मूलस्रोतत्वेनोपतिष्ठन्ति । वेदाः भारतवर्षस्य भारतीयसंस्कृतेश्च मुख्यमवलम्बनमिति । तस्य परमपितुः परमेष्ठिनः साक्षात् वाचः सन्ति इमे वेदाः अतः प्रथमशास्त्रत्वेन एतेषां महत्त्वमनिर्वचनीयं भवति ।[1] यत्र तत्र सर्वत्र "**वेदाः प्रमाणम्**" इति मतं समानतयाङ्गीक्रियते । '**सर्वज्ञानमयो हि सः**' इति वदता मनुना वेदानां सर्वविधज्ञानविज्ञानविद्यानिधानत्वं प्रतिपादितम् ।

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तित : ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।। [2]

सर्वेऽपि विद्वत्तल्लजाः, भारतीयाः, दार्शनिकाः , आचारविचारशिक्षणप्रवणाः, स्मृतिकाराः, शब्दतत्त्वमीमांसादक्षाः, वैयाकरणाः, अन्ये च सकलशास्त्रकाराः वेदानां परमप्रामाण्यं प्रतिपदमुद्घोषयन्ति । सम्भवतः अत एव महर्षिणा पतञ्जलिना समादिष्टं यत् –

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च । [3]

ईश्वरप्रदत्तं श्रेष्टतमं ज्ञानं वेदेषु निहितं वर्तते । ईश्वरस्य इदं महत्काव्यं यत्कदापि न म्रियते नापि जीर्यते । यथा –

अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति ।
देवस्य पश्य काव्यं न ममार न जीर्यति ।। [4]

वेदाः नित्याः यथार्थाः शाश्वताः सम्पूर्णाश्च सन्ति । तेषु किमपि न्यूनत्वं वाधिक्यं नास्ति । सर्वधर्माणां मूलत्वेन वेदानां महिमानं जगदुः ऋषय आचार्याश्च ।[5] सृष्ट्यादौ परमात्मना परमपित्रा प्रदत्ताः वेदाः त्रिकालाबाधिताः, अनेकविद्यास्थानोपबृंहिताः, अपरिवर्तनशीलाः, ज्ञानविज्ञानकोषाश्च वर्तन्ते । महर्षिदयानन्देन सकलसत्यविद्यानां पुस्तकत्वेन वेदस्य महत्त्वं परिगणयन् वेदानां पठनं पाठनं श्रवणं श्रावणञ्च सकलजनानां

प्रमुखं कर्तव्यं प्रतिपादितम् ।[६] वेदे समस्तं ज्ञानं सर्वाः विद्याः निहितास्सन्त्येतस्मादेव कारणाद् महर्षिः मनुः वेदानां सर्वज्ञानमयत्वं प्रतिपादयामास । वेदेषु सर्वविधज्ञानस्य विज्ञानस्य च सूत्राणि विद्यन्ते । एतस्मादेव हेतोर्वेदाः सकलशास्त्रमूलानि सन्ति ।[७] अणुमहतोरभिव्यक्तेर्मूलमेतस्य चाविनशिस्त्रोतः वेदेष्वेवोपलभ्यते । भारतीयसारस्वत-साधनायाः उद्‌गमस्थानं वेदाः । एतादृशानां वेदानां महत्वं प्रतिपादयति याज्ञवल्क्यर्षिः --

न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं हि विद्यते ।

निःसृतं सर्वशास्त्रन्तु वेदशास्त्रात्सनातनात् ।।[८]

वेदशब्दः भारतीयसमाजे यावदादृयते तावन्न कोऽपि शब्दः । वेदः आस्थायाः श्रद्धायाः विषयः अतीतस्य गौरवगीतञ्चास्ति न तु ग्रन्थमात्रमेव । अनैनैव कारणेन भारतीयाः मनीषिणः वेदानां प्रामाण्ये सर्वथा सर्वदा च विश्वसन्ति ।[९] भारतीयपरम्परायां वेदाः नित्याः मन्यन्ते । अस्याधारः वर्तते यत् नित्यस्य सामर्थ्यं नित्यं भवति अनित्यस्य च अनित्यम् । परमात्मा नित्यः अतः तस्य कार्यमपि नित्यम् । अनेन न्यायेन परमात्मनः कृतयः वेदा अपि नित्याः । अनेन तथ्यद्वयं सुस्पष्टं भवति । एकं तु वेदाः नित्याः द्वितीयमेते ईश्वरीयज्ञानानि सन्ति । वेदानां नित्यत्वे ईश्वरोक्तत्वे विशेषेण पाश्चात्याः शङ्कन्ते परं भारतीयाः बुधाः विद्वांसः प्रमाणपुरस्सरं ईश्वरीयज्ञानरूपेण वेदानां नित्यत्वे दृढं विश्वसन्ति प्रमाणयन्ति च ।[१०]

वेदाः अपौरुषेयाः अमनुष्यकृताश्च कथ्यन्ते आचार्यैः विद्वद्‌वरेण्यैः सकलशास्त्रैश्च '**अपौरुषेयं वाक्यं वेदः** ' इति ।[११] भारतीयसंस्कृतौ अनेनैव कारणेन वेदानामप्रतिमं गौरवपूर्णञ्च स्थानं मन्यते । एते वेदाः अस्माकं पूर्वजैः ऋषिभिर्महात्मभिश्च स्वीयहृदि प्रकाशिताः । ते च आविष्कृताः भूत्वा मन्त्रसंहितादिरूपेणास्माकं समक्षं सुशोभन्ते विराजन्ते च । वेदस्य सर्वकालाबाधितत्वं प्रदर्शयन् वेदानां माहात्म्यं मनुरित्थं निजगाद –

उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् ।

तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ।। [१२]

सम्पूर्णस्यापि संस्कृतवाङ्मयस्य मूलस्त्रोतांसि इमे वेदाः सन्ति, ज्ञानस्य पर्यायरूपाः , भारतीयसंस्कृतेः कीर्तिपताकेव दोधूयन्ते, अस्माकं संस्कृतेः सभ्यतायाः जीवनस्य च यशोगाथां सडिण्डिमं गायन्ति । प्रत्यक्षेण अनुमानेन च प्रमाणेन यन्न ज्ञायते तत्सर्वं

वेदैरवगम्यते। अत एव सायणाचार्यः प्राह–

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।

एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।।[१३]

वेदाः न केवलं लौकिकज्ञानभण्डागाररूपाः अपितु अतीन्द्रियस्य पारलौकिकस्यापि ज्ञानस्य अक्षय्याः निधयस्सन्ति । यत्राचार–विचारपरम्परायाः, सभ्यतायाः, संस्कृतेः, मानवजीवनस्य चावश्यकानां सर्वेषामपि तत्त्वानामाद्योपान्तं वर्णनं पर्यालोचितम्। एतेषामेव तत्त्वानां ब्राह्मणारण्यकोपनिषत्दर्शनादिषु परिबृंहणमवलोक्यते।

महर्षिः मनुः वेदानामध्ययनमत्यावश्यकं मन्यते निगदति च – वेदानामध्ययनमेव ब्राह्मणानां परमं तपः। यो जनः वेदाननधीत्यान्येषु शास्त्रेषु श्रमं कुरुते सः जीवन्नैव शुद्रत्वमाप्नोति।

वेदमेव सदाऽभ्यसेत् , तपस्तप्यन् द्विजोत्तमः ।

वेदाभ्यासो हि विप्रस्य, तपः परमिहोच्यते ।।[१४]

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।

स जीवन्नेव शुद्रत्वमाशु गच्छति सान्वयः ।।[१५]

वेदविद्यापारङ्गताः वेदानन्तान् मन्यन्ते । वेदेषु निहितज्ञानस्य सीमानिर्धारणं भवत्यशक्यम्। अतः अनन्तज्ञानसमन्वितास्सन्त्येते वेदाः।[१६] लोकमान्यतिलकः वेदानां परमप्रामाण्यमेवार्यत्वस्य हिन्दुत्वस्य च मुख्यं लक्षणं निरूपयति।[१७] ये सन्ति धर्मजिज्ञासवः तेषां कृते वेदाः प्रमाणानि।[१८]

अत एवास्माकं राष्ट्रस्य सभ्यता-संस्कृति-धर्म-इतिहासादीनां विषयाणां प्रमाणभूतं ज्ञानं प्राप्तुं वेदः सनातनं चक्षुः।[१९] येन चतुर्वर्णानां, चतुराश्रमाणां, त्रयाणां लोकानां, कालानां च ज्ञानाय वेदानामध्ययनमनिवार्यं भवति। सर्वं किमपि वेदैर्साधयितुं शक्यते। यथाह मनुः –

चातुर्वर्ण्यं त्रयो लोकाश्चत्वाराश्रमाः पृथक् ।

भूतं भव्यं भविष्यञ्च सर्वं वेदात्प्रसिद्ध्यति ।।[२०]

वेदशब्दस्य व्युत्पत्तिलभ्योऽर्थः

वेदो नाम वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षरुपापुरुषार्थाः अनेनेति व्युत्पत्त्या चतुर्वर्गज्ञानसाधनभूतो ग्रन्थविशेषः ।[२१] ✓'विद्' धातोर्भावे, कर्मणि, करणे, अधिकरणे वा घञि प्रत्यये विहिते वेदशब्दस्य निष्पत्तिः।[२२] विद् धातुः महर्षि पाणिनिना धातुपाठे चतुरर्थात्मकः पठितः । ✓''विद् ज्ञाने', ✓'विद्लृ लाभे', ✓'विद विचारणे' ✓'विद् चेतनाख्याननिवासेषु'[२३] एते चत्वारो धातवः वेदार्थप्रतिपादने सहायकाः सम्भवन्ति । यथैतस्यां कारिकायां निजगाद –

सत्तायां विद्यते ज्ञाने, वेत्ति विन्ते विचारणे ।

विन्दति विन्दते प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

युगप्रवर्तकानां महर्षिदयानन्दसरस्वतीमहाभागानां दृष्ट्या–''**विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति अथवा विन्दन्ते लभन्ते, विन्दन्ति विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्याः यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः**'' ।[२४]

सायणाचार्यः वेदशब्दं व्याख्यायन्नित्थं कथयति – ''**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः**''।।[२५] यस्मिन्ग्रन्थे अभीप्सितवस्तुनः प्राप्तेः अनिष्टस्य परिहारस्य चालौकिकोपायाः वर्णिताः स वेदः इत्यभिधीयते। वेदशब्दः ज्ञानार्थकः अतः एते वेदाः ज्ञानरूपाः, ज्ञानविषयाः ज्ञेयपदार्थाः ज्ञानसाधनरूपाश्च भवन्ति। वेदशब्दस्य व्याख्यया ज्ञायते यद्वेदेषु सर्वविधं ज्ञानं निहितम्। जीवनस्य जीवनेतरस्य च सर्वासामिष्टीनां, सर्वसत्यसत्ताभियुक्तपदार्थानां समस्तज्ञानस्य च भाण्डागाररूपासन्त्येते वेदाः ।[२६]

पं. बलदेव उपाध्यायः वेदस्येत्थं परिभाषां प्रददाति कथयति च – स्वीयप्रातिभचक्षुभ्यां साक्षात्कृतधर्मभिः ऋषिभिः अनुभूतमध्यात्मशास्त्रतत्त्वानां विशाला विमला च शब्दराशिरेव 'वेदः'इति ।[२७] वैदिकसाहित्यमेतादृशं भण्डारं यदद्यापि वंशमनुवंशं श्रवणपरम्परया श्रुत्वा कण्ठस्थीकरणात्सुरक्षितं वर्तते ।[२८] वेदाः ईश्वरीयज्ञानानि सन्ति यज्ज्ञानमृषिभिराविष्कृतम् ।[२९] एते वेदाः उन्नतेः प्रगतेश्च मार्गदर्शकाः दुष्कर्मभ्यश्च अपहारस्योपायं प्रदर्शयन्ति अतः वेदाः कथ्यन्ते ।[३०]

पाश्चात्यप्राज्ञः विन्टरनिट्जमहोदयः वेदशब्दस्य सामान्यार्थं सर्वोत्कृष्टं ज्ञानं

(Knowledge Par excellence) करोति । कुरानादिग्रन्थविशेषैरथवा बाईबलत्रिपिटकादि कथासंग्रहैः वेदानामाशयः नास्ति। तेन साहित्येन सह वेदानां सम्बन्धः यत् प्राचीनकालात्सहस्त्रवर्षैः मौखिकपरम्परया प्रचलति पुनश्च 'वेद' इति नामकरणमभवदिति ।[३१]

'**श्रुति**' '**आम्नायः**' '**आगमः**' '**निगमः**' '**स्वाध्यायः**' एते वेदस्य पर्यायशब्दास्सन्ति ।

श्रवणपरम्परया गुरुशिष्यपरम्परया च एते वेदाः बहुकालपर्यन्तं सुरक्षिताः अतः 'श्रुति' नामधेयं वेदस्य। ✓'श्रु श्रवणे' इत्यस्माद्धातोः करणकारके क्तिन्प्रत्यये कृते श्रुतिशब्दो व्युत्पद्यते। तथाऽदिसृष्टिमारभ्याद्यपर्यन्तं ब्रह्मादिभिः सर्वाः सत्यविद्याः श्रयन्तेऽनया सा श्रुतिः इति महर्षिदयानन्दः ।[३२] 'निगम' 'आगम' नामनी वेदस्यैव यतो हि इमे अर्थबोधकाः सार्थकाश्च सन्ति। वेदाः साभिप्रायं सुसङ्गतार्थप्रतिपादकाः अतः इमे संज्ञे वेदस्येति ।[३३] स्वाध्यायसंज्ञा ब्राह्मणग्रन्थेषु वेदानां प्रतिपादिता। यः एतान् वेदान्पठति सः योगक्षेमं प्राणैश्वर्यान्नसमृद्ध्यादिसुखानुपभुङ्क्ते ।[३४]

वेदानामाविर्भावः

भारतीयपरम्परया वेदाः अनादयः अपौरुषेयाश्च सन्ति। वैदिकं ज्ञानं ईश्वरप्रदत्तं वर्तते यद् सृष्ट्यादेरारभ्य प्रलयकालपर्यन्तमक्षुण्णरूपेण विराजते। सृष्टेः प्रारम्भे स्वयंभुवा परमात्मना परमतपसामृषीणां हृत्सु वेदज्ञानं प्रदत्तम्, ईश्वरप्रदत्तस्य तस्य दिव्यज्ञानस्यर्षिभिः शब्दरूपेण प्रकटनं, पठनं, पाठनं, श्रावणञ्च विहितम् ।[३५] वेदाः भारतीयस्य धर्मस्य, संस्कृतेः, विज्ञानस्य चोद्गमस्थानानि सन्ति। धार्मिकस्य नैतिकस्य वैज्ञानिकसत्यस्येश्वरप्रदत्तं पूर्णज्ञानं वेदेषु विद्यते।

यथा वेदेषु वेदोत्पत्तेर्वर्णनमुपलभ्यते । तस्माद्यज्ञात्सच्चिदानन्दादिलक्षणात् पूर्णात्पुरुषात् सर्वशक्तिमतः परब्रह्मणः ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्च चत्वारो वेदाः प्रकाशिताः ।

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥[३६]

यस्मात् ऋग्वेदः उत्पन्नः, यस्मात्यजुर्वेदः, यस्मात्सामानि अथर्ववेदश्च प्रादुर्भवन्

स्कम्भं सर्वजगद्धारकं परमेश्वरं जानीहीति।[३७] अत्र रूपकालङ्कारमाध्यमेन वेदानामाविर्भावस्य वर्णनं प्रदर्शितम्। शतपथब्राह्मणेऽपि कथितं यथा शरीरादुच्छ्वासो निःसृत्य पुनस्तत्रैव प्रविशति तथैवेश्वराद्वेदानां प्रादुर्भावतिरोभावौ च भवत इति निश्चयः।

यथा प्रदीप्तात् पावकात् विस्फुलिङ्गा व्युच्चरन्ति एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इति।[३८]

स्वयं भगवता सर्वेषां जनानां कल्याणाय कल्याणीवाचः उपदेशः प्रदत्तः। यथोवाच वेदभगवान्-

यथेमां वाचं कल्याणीमावदानि जनेभ्यः।[३९]

अपि च -

प्रनूनं ब्रह्मणस्पतिर्मन्त्र वेदत्युक्थम्।[४०]

ईश्वर एव वेदवाण्याः बृहस्पतिः। एषा वरदा वेदवाणी ऋषीणां हृदि उत्पद्यते विलसति च। ततश्च ते ऋषयः तत्तद्वस्तूनां नामोच्चारणं कुर्वन्ति।[४१]

तद्वदन्येष्वपि बहूषु मन्त्रेषु परमात्मनः वेदाः समुद्भूताः इति वर्णनं समुपलभ्यते। वेदमन्त्रेषु वेदोत्पत्तेः यानि प्रमाणानि सन्ति तेषामत्र संक्षेपतः उल्लेखो विधीयते -

- **स्तोमश्च यजुश्च ऋक्क साम च बृहच्च रथन्तरञ्च। स्वर्देवा अगन्म ..।**[४२]
- **ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये ....।**[४३]
- **तस्मै नूनमभि द्यवे वाचा विरूपनित्यया।**
  वृष्णे चोदस्व सुष्टुतिम्।[४४]
- **सुपर्णोऽसि गरुत्मान् - स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम साम ते तनुः।**[४५]
- **ऋचो नामास्मि यजूंषि नामास्मि सामानि नामास्मि।**[४६]
- **ऋक् साम यजुरुच्छिष्टे।**[४७]
- **स उत्तमां दिशमनुव्यचलत्।**
  तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन्॥[४८]

- ब्रह्माणो यस्यामर्चयन्त्यृग्भिः साम्ना यजुर्विदः ।[४९]
- ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः ॥[५०]
- चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥[५१]
- इन्द्राय साम गायत विप्राय बृहते बृहत् ।
ब्रह्मकृते विपश्चिते पनस्यवे ॥ [५२]
- यस्मिन्वेदा निहिता विश्वरूपाः ॥ [५३]
- अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ॥[५४]

वेदेषु कथितैः उपर्युक्तप्रमाणैः निश्चप्रचमेतत्वक्तुं शक्यते यद्वेदाः अपौरुषेयाः ईश्वरकृताश्च सन्ति । न केवलं वेदेष्वेवापितु अन्येष्वपि शास्त्रेषु वेदानां रचयिता परमेष्ठी प्रजापतिः परमात्मेवैति प्रतिपादितम् । उपनिषदः, ब्राह्मणग्रन्थाः, स्मृतयो, महाभारतादीनि बहूनि शास्त्राणि वेदानां नित्यत्वमपौरुषेयत्वं सर्वज्ञाननिधानत्वं च एकस्वरेण निरूपयामासुः । तेषामप्यिह सामान्येन दिङ्मात्रं विवरणं दीयते । यथा एतरेयब्राह्मणे –

त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत ।
यजुर्वेदो वायोः सामवेदः आदित्यात् ॥[५५]

मुण्डकोपनिषदि परा अपराविद्ययोः उल्लेखे अपराविद्यासु चतुर्णां वेदानामाविर्भावस्य वर्णनं समुपलभ्यते।

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः ।[५६]

तथैव छान्दोग्योपनिषद्यपि –

ऋग्वेदं विजानाति यजुर्वेदं सामवेदाथर्वणं चतुर्थम् ॥ [५७]

मनुस्मृतौ इत्थं वेदानामुत्पत्तेः वर्णनं चकार मनुः –

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम् ॥[५८]

महाभाष्यस्य प्रथमाह्निके महाभाष्यकारः पतञ्जलिः चतुर्णां वेदानां तन्शाखानां च संख्यासहितं विवरणं ददौ –

चत्वारो वेदाः साङ्गा सरहस्या बहुधा भिन्नाः । एकशतमध्वर्युशाखाः सहस्त्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यम् नवधाथर्वणो वेदः ॥[५९]

रामायणेऽपि किष्किन्धाकाण्डे चतुर्णां वेदानामुल्लेखः कृतः महर्षिवाल्मीकिना –

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।

नासामवेदविदुषः शक्यमेवं विभाषितुम् ॥[६०]

शतसाहस्त्रीसंहितारूपेण प्रथिते कृष्णद्वैपायनव्यासविरचिते महाभारतेऽपि बहुशः वेदानां तदुत्पत्तेश्च वर्णनानि लभन्ते ।

– **त्रयीविद्यामवेक्षेत वेदेषूक्तमथाङ्गतः ।**

ऋक्सामवर्णाक्षरतो यजुषोऽथर्वणस्तथा ॥[६१]

– **वैदेश्चतुर्भिः सुप्रीता ॥**[६२]

– **ऋग्वेदः सामवेदश्च यजुर्वेदश्च पाण्डव ॥** [६३]

– **यज्ञा वेदाश्च चत्वारः ॥** [६४]

– **ऋग्वेदः सामवेदश्च यजुर्वेदोऽप्यथर्वणः ॥** [६५]

हरिवंशपुराणे सरहस्यसविस्तराः चत्वारो वेदाः इत्युक्त्या वेदानां वर्णनमीदृशं प्रस्तुतम् ।

ऋचो यजूंषि सामानि छन्दांस्यथर्वणानि च ।

चत्वारस्त्वखिला वेदा सरहस्यसविस्तराः ॥[६६]

अपि च पद्मपुराणे –

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ॥ [६७]

इत्थं चतुर्णां वेदानामुत्पतेः वर्णनं यत्र तत्र सर्वत्रोपलभ्यते । सर्वानुक्रमण्यां यथा –

विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते ।

ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये ॥[६८]

सृष्ट्यादौ भगवता स्वयं वेदाः विरचितास्तथा प्रलयकालेऽपि ते वेदाः सूक्ष्मरूपेण तिष्ठन्ति।[६९] तेषां कदापि विनाशः न भवति।[७०] एते वेदाः नित्याः सनातनाः समस्तविद्यानां भाण्डागाररूपास्सन्ति। प्रदीपवत् एते सर्वार्थप्रकाशकास्सन्ति। एतेषां वेदानामीश्वरमतिरिच्य कोऽन्योपि कर्ता प्रणेता न भवितुमर्हः। [७१] जनः एतादृशं शास्त्रं निर्मातुं न शक्नोति। पक्षपातरहितधर्मस्य प्रतिपादनं वेदेषु अतः वेदाः ईश्वरोक्ताः एवेति शङ्कराचार्यः।[७२] तपस्विनो धीमन्तो श्रुतिविज्ञानचक्षुषो जानन्ति यद्वेदाः तस्यैव परमात्मनः निश्वसिताः[७३]अतः नित्यज्ञानरूपास्सन्त्येमे[७४] अपौरुषेयाः सर्वविधज्ञानसमन्विताश्च सन्ति।[७५]

वेदानां कालनिर्धारणम्

भारतीयसाहित्य-परम्परानुसारं वेदाः नित्याः, सनातनाः, शाश्वताः, अपौरुषेयाश्च एतेषां प्रणयनं स्वयं भगवता विहितं सृष्टिरचनादाविति। स्वयमीश्वरेण आविर्भूताः वेदाः प्रलयकालेऽपि सूक्ष्मरूपेणावतिष्ठन्ते तथापि जिज्ञासेयं समुत्पद्यते यदेतस्यालौकिकवैदिकज्ञानस्य ज्योतिः कस्मिन्काले भारतवर्षे प्राज्वलत्? विदूषां कृते इदं महत् दुष्करं कार्यं वेदानां कालनिर्धारणस्य।

एकत्र भारतीयाः जनाः वेदाननाद्यपौरुषेयान् मन्यन्ते यस्याविर्भावः आदिकाले ईश्वरकृपया महर्षीणां शुद्धान्तःकरणे समाध्यवस्थायामभवत्। ततश्च एतेषां वेदमन्त्राणां संरक्षणं महर्षयः गुरु-शिष्यपरम्परया कण्ठस्थीकरणं कृत्वा चक्रुः। वेदमन्त्राणां दर्शनादेते ऋषयः कथ्यन्ते। यथा - "**ऋषयो मन्त्रद्रष्टारः**"। अतः तेषां मतेन वेदरचनाकालविचारः निरर्थकः भवति।

भारतीयाः विबुधाः मन्यन्ते यत्वेदानामाविर्भावः सृष्टिनिर्माणेन सहैव सञ्जातः। यथेश्वरः अखण्डः नित्यः अनादिः अनश्वरश्च तथैव वैदिकं ज्ञानं वेदाश्चापि नित्याः अनादयः अनश्वराश्च सन्ति। यथा ऋग्वेदे कथितम्-

तस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम्॥[७६]

एतस्मिन्मन्त्रे साक्षादीश्वरादेव चत्वारो वेदाः समुत्पद्यन्त इति ज्ञायते। पूर्वस्मिन्प्रकरणे ईश्वरादाविर्भावस्य वेदस्य नैकानि प्रमाणानि आप्तवंचासि च प्रदर्शितानि। एतैः प्रमाणैः वेदानामपौरुषेयत्वं सिद्ध्यति। सृष्ट्यादौ स्वयंभुवेश्वरेण वेदस्वरूपायाः

नित्यवाचः प्रकाशः कृतः येन मनुष्यस्य सर्वाः प्रवृत्तयः भवन्ति।

अनादिनिधनानित्या वागुत्सृष्टा स्वयम्भुवा ।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[७७]

यदि वेदाः अपौरुषेयाः नित्याश्च तर्हि कालनिर्धारणस्य प्रश्नः नोद्भवति। तथापि कैश्चन विद्वद्भिः ज्योतिषभूगर्भादिमाध्यमेन वेदानां कालनिर्धारणस्य प्रयासो विहितः। वस्तुतः वेदकालनिर्णये बहव्यः समस्याः सन्ति। यथा –

(१) प्रामाणिकान्तःसाक्ष्यस्य बहिःसाक्ष्यस्य सर्वथाऽभावः।

(२) प्राचीनवैदिकग्रन्थेषु तिथिसंवत्सरादीनामनुल्लेखः।

(३) वेदानामपौरुषेयत्वम्।

(४) वेदेतरसाहित्ये वेदानामुल्लेखस्तथापि तिथिनिर्धारणस्य अकथनम्।

(५) ज्योतिषभूगोलाद्युल्लेखानामस्पष्टता।

(६) भारतीयपाश्चात्यदृष्टिकोणे मौलिकमन्तरम्।

(७) वेदेषु ऐतिहासिकतथ्यानि सन्ति वा न वा इति संशयः।[७८]

एतैः कारणैः वेदकालनिर्णये महान् मतभेदो दृश्यते। इह केषाञ्चिद्विदुषां मतानि प्रदर्श्यन्ते। (१) पाश्चात्याः विद्वांसः (२) भारतीयाः विद्वांसः।

पाश्चात्याः विद्वांसः

मैक्समूलरमतम्

मोक्षमूलरः गौतमबुद्धस्याविर्भावं स्वीयमाधारं मत्वा वैदिककालं भागचतुष्टये विभनक्ति। वेदानां च समयः १२०० ई.पू. स्वीकरोति। छन्दःकालः, मन्त्रकालः, ब्राह्मणकालः, सूत्रकालश्च। चतुर्कालान् परिगणय्य सर्वेषां मध्ये २०० वर्षस्य अन्तरं प्रदर्शयामास।[७९]

(क) १२०० ई.पूर्वतः १००० ई. पूर्वपर्यन्तं छन्दःकालः अवर्तत। तदात्वे वैदिकमन्त्रा सृष्टाः।

(ख) १००० ई.पूर्वतः ८०० ई. पूर्वपर्यन्तं मन्त्रकालः। संहितानां संकलनं तदाऽभवत्।

(ग) ८०० ई.पूर्वत: ६०० ई. पूर्वं ब्राह्मणकाल: आसीत् तस्मिन्काले ब्राह्मणानि अरचयन्।

(घ) ६०० ई.पूर्वत: ४०० ई. पूर्वं सूत्रकाल: । तस्मिन्समये श्रौतगृह्यादिसूत्राणि रचितानि।

किञ्चित्कालपर्यन्तम् इदं मतं प्रचलितम्। कोलब्रुक–विल्सन–कीथादि विद्वांसोऽपि तं मतं समर्थितवन्त:। पुन: स्वयं स्वमतं खण्डयित्वा **'chips from german workshop'** पुस्तके १५०० ई.वर्षपूर्वं वेदानां रचनातिथि: सुनिश्चिता। १८९० तमे वर्षे स्वीयपुस्तके **"Physical Religion"** नामधेये स: कथयति – We could hope to be able to laydown at terminus Que -Weather the 'Vedik humans' were Compossed in 1000 or 1500 or 2000 or 3000 or Years B.C.no Power on earth Could ever fix. १४०० ई. पूर्वस्य बोगाजकोई शिलालेखप्राप्ते: अनन्तरं एतन्मतं सर्वथा निरस्तमभवत्।

जिमरमैनमतम्

जिमरमैन महोदय: कथयति यद्वेदानां कालनिर्धारणं न भवितुं शक्नोति। समयस्य व्यर्थयापनमेवैतत्कार्यमिति। स: वक्ति यद्वेदा: संसारस्य सर्वप्राचीना: ग्रन्था: सन्ति इति सुनिश्चितम्।

बेबरमतम्

जर्मनविदुषा बेबरमहोदयेन कथितम् – वेदा: विश्वसाहित्ये सर्वप्राचीना: ग्रन्था: सन्ति। ऋग्वेदस्याध्ययनेन ज्ञायते यद् आर्या: सर्वप्रथमं पञ्चनद (पंजाब) प्रदेशे आगता:। पुन: पूर्वदिश: दक्षिणं प्रति याता: । दक्षिणदेशे ब्राह्मणग्रन्थानां प्रसारेण ज्ञायते यत् धर्मसिद्धान्तानां विकासे नूनं बहव्य: शताब्द्य: संलग्ना: स्युरिति।[८०] एतदुक्त्वा स: वेदानां कालनिर्धारणं न चकार।

याकोबीमतम्

जर्मनदेशस्य वैदिकविदुषा ज्योतिषमाधारीकृत्य कालनिर्धारणं विहितम्। मैक्समूलरमतस्य खण्डनं कृत्वा ध्रुवतारकं लक्षीकृत्य याकाबीमहोदयेन विचार: प्रकटित: यद् विवाहसंस्कारे **'ध्रुवं पश्यं'** विधिरस्ति। ध्रुवोऽपि स्वस्थानात् पृष्ठे गच्छति। तेनाधारेण तेन ऋग्वेदस्य समय: ४५०० ई. पूर्वं स्वीकृत:।[८१]

विन्टरनित्समतम्

विन्टरनित्समहोदयः 'मितानी' शिलालेखानामाधारेण सर्वमतान् च निरीक्ष्य समन्वयरुपेण मतं प्रकटयति । वैदिककालश्च २५०० ई. पूर्वतः ५०० ई.पूर्वं मत्वा वेदानां कालः २५०० ई.पूर्वं मन्यते ।[८२]

विन्कलर-ह्युगो मतम्

बोधाजकोई नाम स्थाने प्राप्तशिलालेखैः तत्र च हित्तिति-मिसानी जातेः मध्ये इन्द्र-वरुण-मित्रादीनां साक्षित्वेन उल्लेखकारणेन १४०० ई. पूर्वं डॉ. ह्युगो विंकलर वेदानां समयनिर्धारणं करोति ।

मार्टिन हॉगमतम्

डॉ.मार्टिन होगमहोदयोऽपि २४०० तः २००० ई.पूर्वं वेदानां समयं स्वीकरोति ।[८३] वेदाङ्गज्योतिषाधारेण मैक्समूलरवत् चतुर्षु भागेषु वैदिककालं विभनक्ति । यथा -

प्राचीनसूक्तसमयः - २४०० तः २००० ई.पूर्वम्

संहितासमयः - २००० तः १४०० ई. पूर्वम्

ब्राह्मणसमयः - १४०० तः १२०० ई. पूर्वम्

सूत्रसमयः - १२०० ई. पूर्वम्

मुग्धानल (Macdonell) मतम्

निजेतिहासग्रन्थस्य भूमिकायाम् इतिहासस्य भाषाविज्ञानस्य दृष्ट्या स्वीयमतं मुग्धानलः प्रकटयामास । पूर्वम् आर्याः पारसिनश्च एकस्याः एव जातेः आसन् । १३०० ई. पूर्वं ते पृथक् जाताः । तस्मिन्नैव काले ऋग्वेदः रचितः अतः वेदानां रचनाकालः १३००-१४०० ई.पूर्वं मन्यते मुग्धानलः ।

ईप्सनमतम्

ईप्सनमहोदयः ऋग्वेदे 'ताम्र' 'गौ' आदीनामर्थानां शब्दाः भारोपीयकाले प्रचलिताः इति कथयति । ते च मूलतः सुमेरियन जातेः सन्ति । अतः भारोपीयकालः ३००० तः २१०० ई.पूर्वमासीत् । स एव समयः वेदरचनायाः ।

एडवर्ड मायरमतम्

एडवर्ड मायरमहोदयस्य मतेन वैदिकदेवाः आर्यकालीनाः सन्ति । तदा केचन आर्याः पश्चिमोत्तरभारतमागताः पुनश्च ऋग्वेदः रचितः । अतः वेदानां समयः १५०० ई. पूर्वं सिद्ध्यति ।

इत्थम् अन्यैः ह्विटनी –श्रोदर –ओल्डेनबर्ग – स्टेन कानो आदयः विद्वांसः यथाबुद्धि वेदानां कालं निर्धारयामासुः ।

भारतीयाः विद्वांसः

लोकमान्यतिलकमतम्

लोकमान्यबालगङ्गाधरतिलकेन शतपथब्राह्मणे वर्णिते वसन्तसम्पातसमये कृत्तिकानक्षत्रस्य संयोगमवलोक्य ज्योतिषाधारेण ६००० ई.पूर्वतः ४००० ई.पूर्वं समयः स्वीकृतः ।[८४] तत्र च नक्षत्रकालानां चतुर्षु भागेषु विभाजनं करोति ।

अदितिकालः – ६००० तः ४००० ई.पूर्वम्

मृगशिराकालः – ४००० तः २५०० ई. पूर्वम्

कृत्तिकाकालः – २५०० तः १४०० ई. पूर्वम्

अन्तिमकालः – १४०० तः ५०० ई. पूर्वम्

बालकृष्णदीक्षितमतम्

श्री शंकरबालकृष्णदीक्षितः ज्योतिषाधारेण नक्षत्राणां गतिं निरीक्ष्य ३५०० ई.पूर्वं वेदानां समयं मन्यते । शतपथब्राह्मणस्य रचनाकाले कृतिकाः पूर्वबिन्दौ उदयन्ति स्म इति महत्त्वपूर्णमंशमुद्धृत्य[८५] सः वेदानां कालनिर्धारणं करोति ।

आर.जी.भण्डारकरमतम्

डॉ. आर.जी. भाण्डारकरः वैदिकमंत्राणामाधारेण '**असूर्या नाम ते लोका**'[८६] इति यजुर्वेदस्य मन्त्रमुद्धृत्य तत्र 'असीरिया' 'मेसोपोटानियादि' स्थानोल्लेखेन ६००० ई.पूर्वं वेदानां कालं निर्धारयति ।

अविनाशचन्द्रदासमतम्

श्रीदासः ऋग्वेदे प्राप्तेभ्यः भूगोलभूगर्भसम्बद्धेभ्यः प्रमाणेभ्यः ऋग्वेदस्य रचनाकालः २५०० ई. वर्षपूर्वमिति मन्यते।[८७] ऋग्वेदस्य एकस्मिन्मन्त्रे सरस्वतीनद्याः पर्वतात् हिमालयात् उद्भूय सागरं प्रति गमनं वर्णितम्।[८८] सरस्वती नदी अधुना लुप्ता समुद्रश्च शुष्कः सञ्जातः। राजस्थानप्रदेशे सः समुद्रः अवर्तत इति घटनां विविच्य कालनिर्णयं विदधाति अविनाशचन्द्रदासः।

नारायणरावपारंगीमतम्

भौगोलिकप्रमाणान् ज्योतिषं च आधाररूपेण स्थापयन् श्रीनारायणरावपारंगीमहोदयः ऋग्वेदस्य समयः ९००० ई. पूर्वं स्वीकरोति।

दीनानाथशास्त्रीचुलैटमतम्

पं. दीनानाथशास्त्रीचुलैटमहोदयः **'वेदकालनिर्णय'** अभिधेये ग्रन्थे ज्योतिषप्रमाणान्युद्धृत्य ३००००० त्रिलक्षवर्षपूर्वं वेदाः रचिताः इति कथयति।

डॉ. सम्पूर्णानन्दमतम्

डॉ. सम्पूर्णानन्दः 'Home Aryans' नामधेये पुस्तके ऋचासु भूकम्पस्य सङ्केतानुद्धृत्य ऋग्वेदस्य समयः ५०००० तः २५००० ई.पूर्वं प्रतिपादयति। आर्याः एतामवस्थां दृष्टवन्तः अतः एव एतादृक् वर्णनं वेदेषु लभते इति सः कथयामास।

रघुनन्दनशर्मामतम्

रघुनन्दशर्मामहोदयः ८८००० वर्षपूर्वं वेदाः रचिताः इति प्रत्यपादयत्।[८९]

डॉ. बी.बी.चौबेमतम्

डॉ. व्रजबिहारी चौबेमहोदयः स्वीयग्रन्थे वेदानां कालनिर्धारणस्य मध्यममार्गमवचिनोति। तत्र सः वेदान् पुरुषकृतान् ज्ञापयति[९०] यदनुपयुक्तं दृश्यते यतोहि ऋषयः मन्त्रान् ददर्शुः न तु अरचयन्त।

महर्षिस्वामीदयानन्दमतम्

आर्यसमाजस्य प्रवर्तकः महर्षिस्वामिदयानन्दमहाभागः वेदानामुद्भवः परमात्मनः सृष्ट्यादौ सञ्जातः इति मन्यते। पुनश्च अग्नेः ऋग्वेदस्य वायोर्यजुर्वेदस्य

आदित्यात्सामवेदस्य अङ्गिरसश्च अथर्ववेदस्य समुत्पत्तिं सप्रमाणं ऋग्वेदादिभाष्यभूमिकायां प्रतिपादयामास । यः समयः सृष्ट्युत्पतेः सः एव कालः वेदानामिति निरूप्य १९६०८५३१२६ वर्षपूर्वं वेदानां समयं प्रदर्श्य वेदानामुद्भवस्य विवरणं ददाति।[११]

एतदतिरिक्तं बहवः भारतीयाः विद्वांसः वेदकालनिर्णयं चक्रुः । विस्तारभयादिह न प्रदर्श्यते। उपर्युक्तविवरेणन निरीक्षिते विचारिते सति चावलोक्यन्ते विदुषां भिन्न-भिन्नमतानि । एकपक्षीयाः विद्वांसः वेदाः अपौरुषेयाः नित्याः अनादिरूपाः अनन्ताश्च इति मत्वा वेदकालनिर्धारणं न विहितवन्तः । पाश्चात्यैः भारतीयैश्च बहुविधानाधारान्मत्वा वेदस्य कालनिर्धारणस्य प्रयासः कृतस्तथाऽपि कोऽपि निष्कर्षः नावाप्तः । प्रायशः पाश्चात्त्यैः स्वीयजीवनस्य अधिकः समयः वेदकालनिर्णये व्यर्थं यापितः अपि च सामान्यजनानां मनसि कुतथ्यानि प्रपूर्य वेदाः अपौरुषेयाः नेति भ्रमः समुत्पादितः । तेषु बेबरमहोदयः वेदानां समयनिर्धारणं न कृतवान् अकथयच्च - वेदाः तस्मिन् काले रचिताः यत्र निश्चेतुं अस्मत्सकाशे उपयुक्तसाधनानामभावः अस्ति । वर्तमानप्रमाणानि वेदानां रचनायाः कमपि कालविशेषं ज्ञापयितुमसमर्थाः सन्ति ।

एतैः तथ्यैः वेदानां कालनिर्धारणं न निश्चेतुं शक्यते तथापि निश्चप्रचं प्राचीनाः पाश्चात्याः वा विद्वांसः वेदान् सर्वप्राचीनान् मन्यन्ते । अतः इमे वेदाः कदा रचिताः इति न ज्ञायते परं सर्वप्राचीनाः सन्ति इमे वेदाः इति निष्कर्षः ।

वैदिकसाहित्यस्य विभाजनम्

वैदिकसाहित्यं सामान्येन दृष्टे चतुर्धा विभक्तुं शक्यते । (१) संहिताः (२) ब्राह्मणानि (३) आरण्यकानि (४) उपनिषदः । एतदतिरिक्तं वेदाङ्गानामपि वैदिकसाहित्ये समावेशः यतोहि वेदाङ्गानि वेदार्थज्ञाने सहायकानि भवन्ति । निरुक्तकारः यास्कः स्वयं वेदार्थविदः विदुषः प्रशंसां कुर्वन्नाह-

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।।[१२]

यः केवलं वेदस्याक्षरान् वेत्ति कण्ठस्थं वा कुरुते किन्तु वेदार्थं न जानीते सः पत्र-पुष्प-फलशून्यः स्थाणुरिव भारं वहति । यश्च वेदार्थज्ञः सः सर्वान्सुखानुपभुङ्क्ते ते

वेदज्ञानेन च पापान् विनाश्य स्वर्गमवाप्नोतीत्यर्थः। अतः वेदार्थज्ञानाय वेदाङ्गानामप्यध्ययनमनिवार्यं भवति।

एतेषां क्रमशः संक्षपेण विवरणं प्रस्तूयते ----------

संहिताः

'संहिता' शब्दस्य पारिभाषिकः अर्थः '**परः सन्निकर्षः संहिता**'[९३] इति। यत्र वर्णानामत्यन्तं सान्निध्यं सा संहितेति व्यवह्रियते। यास्काचार्यमतेन पदानां सन्धीयमानानां प्रकृतिः अथवा पदान्येव प्रकृतिर्यस्याः सा संहितेति सम्बोध्यते।[९४]

संहिताशब्दः मूलतः ग्रन्थवाचकः यत्र भाष्यं व्याख्यानं नास्ति मूलमन्त्राः सूक्तानि वा यत्र सा संहितेति। संहन्यन्ते एकत्रीक्रियन्ते मन्त्राः सूक्तानि वा अस्यां सा संहिता इति व्युत्पत्तिः।[९५] संक्षेपेण यत्र ऋषिभिः दृष्टमन्त्राणां तन्सूक्तानां च सङ्कलनं क्रियते सा संहिता कथ्यते।

पुनश्च संहिताः कतिविधाः इति प्रश्ने समुपस्थिते चतस्रः संहितेति एके अपरे च तिस्रः संहिताः इति।

प्रायः सर्वत्र चतसृणां संहितानामेव उल्लेखः प्राप्यते। यथा ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। वेदानामाविर्भावप्रसङ्गे सप्रमाणं चतुर्णां वेदानामुल्लेखः सुस्पष्टं अवलोकयितुं शक्यते।

(क) तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।[९६]

(ख) स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्॥[९७]

इत्यादि।

अपवादरूपेण केषुचित्स्थलेषु वेदत्रय्याः उल्लेखोऽपि लभ्यते। यथा ऐतरेयब्राह्मणे '**त्रयो वेदा अजायन्त**'[९८], तैत्तिरीयब्राह्मणे '**वैदेरशून्यैस्त्रिभिरेति सूर्यः**'[९९] '**यमृषयस्त्रयीविदो विदुः**'[१००] इत्यादीभिर्वाक्यैः स्वाभीष्टं मतं प्रतिपादयितुं प्रमाणरूपेण इमं पद्यं प्राज्ञाः प्रास्तुवन् –

ऋचैव होत्रं क्रियते, यजुषाऽऽध्वर्यवम्, साम्नोद्गीथम्।
अथ केन ब्रह्मत्वं क्रियते ? त्रय्या विद्ययेति ब्रूयात्॥[१०१]

इह केषुचित्स्थलेषु ऋग्वेदस्य यजुर्वेदस्य सामवेदस्य इति त्रयाणां वेदानां कथनम् । विचारिते सति अयं विभागः शैलीदृष्ट्या विहितः प्रतीयते । येषु मन्त्रेषु अर्थवशेन पादव्यवस्था तादृशानां छन्दोबद्धमन्त्राणां कृते 'ऋक्' यत्र गीत्यात्मकाः ऋचः तत्र साम एताभ्यां व्यतिरिक्तस्य कृते च यजुरिति व्यवहारः भवति स्म ।

तेषामृग्यत्रार्थवशेन पादव्यवस्था ।[१०२]

गीतिषु सामाख्या ।[१०३]

शेषे यजुः शब्द : ।[१०४]

इत्थं त्रिभिः ऋचात्मक-गीत्यात्मक-गद्यात्मकविधाभिः त्रयीति व्यवहारः कुत्रचित् दृश्यते । पुनश्च द्वितीयः विभागः विषयदृष्ट्या क्रियते । तत्र ऋक्-यजु-साम-अथर्वणां क्रमशः ज्ञान-कर्म-उपासना-विज्ञानविषयाः सन्ति । अतः एतेषां वेदानां चतुर्धा विभागः प्रदर्श्यते । निष्कर्षरूपेण शैलीरूपेण वेदानां त्रयी विषयरूपेण च चतुष्टयव्यवहारः शास्त्रेषु परिकीर्तितः । [१०५]

आश्वलायनसंहितायां एतस्य निराकरणमित्थं विहितम् -

सद्ये केचन छान्दोग्यो वाऽऽध्वर्यवे वा होत्रामर्शाः समाम्नाताः, न तान्ब्रुयाद् कृत्स्नत्वाद् होत्रस्य ॥[१०६] सायणाचार्यः एतस्य प्रश्नस्योत्तरं एतस्य कथनस्य व्याख्यायां स्पष्टरूपेण व्यदधात् । यथा - **अत एव वाङ्मनसर्निर्वर्त्थस्य यज्ञशरीस्य अर्थमेत्र त्रिभिर्वेदैर्निर्माद्ये, अर्थान्तरं तु अथर्ववेदेनैव । मनसैव ब्रह्म यज्ञस्यान्यतरं पक्षं संस्करोति ?**[१०७] **एतदेवाभिप्रेत्य । प्रश्नपूर्वकम् अथर्वविद् एव ब्रह्मत्वमाम्नातम् ॥**[१०८]

विनियोगाधारेणैव चतुर्णां वेदानां कृते त्रयीव्यवहारः । यथा ऋग्वेदसर्वानुक्रमण्यां प्रतिपादितम्-

विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते ।

ऋग्यजुः सामरूपेण मन्त्रो वेदचतुष्टये ॥ [१०९]

विन्टरनित्समहोदयोऽपि '**प्राचीनभारतीयेतिहासः**' नामपुस्तके केषाञ्चित् सूक्तानामाधारेण कथयति- अथर्ववेदस्य कानिचन सूक्तानि ऋग्वेदसमकालीनानि पूर्वतनीयानि वा प्रतीयन्ते इति । अतः वेदशब्दः ऋग्यजुसामाथर्वणां वाचकः सिद्ध्यति ।

ऋग्वेदः

चतुर्षु वेदेषु ऋग्वेदः सर्वप्रथमः परिगण्यते । संसारपुस्तकागारे सर्वप्राचीनग्रन्थत्वेनापि ऋग्वेदः पूज्यते प्रशस्यते च । आकारदृष्ट्या ऋग्वेदः विशालः वर्तते । ऋग्वेदमाहात्म्यं वर्णयन्तैत्तिरीयसंहितायां कथितं या क्रिया यजुःसामाभ्यां क्रियत सा शिथिला भवति परम् ऋचा सम्पादिता यज्ञक्रिया दृढा भवति ।[११०]

ब्राह्मणग्रन्थाः अपि स्वाभीष्टार्थसम्पादनाय '**तदेतद् ऋचा अभ्युक्तम्**' इति वाक्यं प्रयोजयन्ति ।

ऋक् शब्दस्य अर्थः भवति स्तुतिमन्त्राः छन्दोबद्धपद्यमयी रचना च । अस्मिन् ग्रन्थे विविधदेवानां स्तवनं पद्यात्मकेषु वाक्येषु वर्तते ।[१११] ऋक्शब्दस्य एताः परिभाषाः ग्रन्थेषु विद्वद्भिर्विहिता ।

१. ऋच्यन्ते स्तूयन्ते देवा अनया इति ऋक् ।[११२]

२. पादेनार्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः ।[११३]

३. तेषामृक् यत्रार्थवशेन पादव्यवस्था ।[११४]

४. यत्र पादकृता व्यवस्था स मंत्रो ऋक्नामेति शबरस्वामी ।

विष्णुमित्रः अपि स्वीयग्रन्थे ऋचः इत्थं परिभाषां ददाति –

यः कश्चित्पादवान्मन्त्रो युक्तश्चाक्षरसम्पदा ।
स्वरयुक्तेऽवसाने च तामृचं परिजानते ॥

यत्र पादव्यवस्थया नियताक्षरैः समन्वितवाक्यैः छन्दोबद्धमन्त्रैः देवाः स्तूयन्ते तस्य ऋक्संज्ञेत्यभिप्रायः । सामान्यरूपेण ऋग्वेदस्य ब्रह्मा देवता, गायत्री छन्दः, श्वेतवर्णश्चास्ति ।[११५]

ऋग्वेदस्य विभाजनं प्रकारद्वयेणावलोक्यते (१)अष्टकक्रमेण (२) मण्डलक्रमेण

अष्टकक्रमेण ऋग्वेदे ८ अष्टकानि, ६४ अध्यायाः, २०२४ वर्गाः, बालखिल्यसूक्तसहितानि १०२८ सूक्तानि, १०,५५२ मन्त्रास्सन्ति । मण्डलक्रमेण ऋग्वेदे १० मण्डलानि, ८५ अनुवाकाः, १०२८ सूक्तानि १०,५५२ मंत्राः, ३,९७,२५६ अक्षराणि च वर्तन्ते ॥ [११६]

महर्षिः पतञ्जलिः १५० ई. पूर्वं महाभाष्ये ऋग्वेदस्य एकविंशतिशाखानामुल्लेखं करोति। चरणव्यूहानुसारं ऋग्वेदस्य प्रमुखाः पञ्चशाखाः सन्ति – (१) शाकल (२) वाष्कल (३) आश्वलायन (४) शाङ्खायन (प) माण्डूकायन। सम्प्रति ऋग्वेदस्य शाकलशाखव प्रचलति।

मण्डलक्रमानुसारं तेषां केचन ऋषयः सन्ति यैः मन्त्राणां दर्शनं कृतम्। अत्र मण्डल-सूक्त-मंत्र-ऋषिनामक्रमेण विवरणं प्रस्तूयते।

मण्डल	सूक्तसंख्या	मन्त्रसंख्या	ऋषिनाम
१.	१९१	२००६	मधुच्छन्दाः, मेधातिथिः, दीर्घतमाः, अगस्त्यः, गोतमः, पाराशरादयः।
२.	४३	४२९	गृत्समदः तन्वंशजाश्च
३.	६२	६१७	विश्वामित्रः तन्वंशजाश्च
४.	५८	५८९	वामदेवः तन्वंशजाश्च
५.	८७	७२७	अत्रिः तन्वंशजाश्च
६.	७५	७६५	भरद्वाजः तन्वंशजाश्च
७.	१०४	८४१	वसिष्ठः तन्वंशजाश्च
८.	१०३	१७१६	कण्व, भृगु, अङ्गिरस् तन्वंशजाश्च
९.	११४	११०८	ऋषयः, विषयः– पवमानसोमः
१०.	१९१	१७५४	त्रित, विमद, इन्द्र, श्रद्धा कामायनी, इन्द्राणी, शची, उर्वशी आदि।
योग :	१०२८	१०,५५२	

ऋग्वेदे आहत्य विंशति (२०) छन्दसां प्रयोगस्तथापि सप्तछन्दांसि प्राधान्येन दृष्टिपथमायान्ति। (१)गायत्री (२)पङ्क्ति (३)उष्णिक् (४)त्रिष्टुप् (५)अनुष्टुप् (६)बृहती (७)जगती च। एतानि सप्तछन्दांसि ऋग्वेदे मुख्यानि सन्ति।[११७]

ऋग्वेदस्य प्रमुखविषयः ज्ञानं वर्तते। ऋग्वेदे सामाजिकार्थिकराजनैतिकनैतिका-

ध्यात्मिकवैज्ञानिकरूपाणां तत्त्वानां विशदं विवेचनं देवस्तुतिमाध्यमेन प्रदर्शितमस्ति । मानवजीवनाय उपकारकाणां बहूनां तत्त्वानां प्रार्थनापूजादिभिः समावेशः अत्रास्ति। देवेभ्यः श्रियः, यशसः, विद्यायाश्च कृते प्रार्थना वर्तते । हिरण्यगर्भ–नासदीय–पुरुषसूक्तानि च सृष्टिप्रक्रियया सह वैज्ञानिकरहस्यानुद्घाटयन्ति।

पुरुरवा–उर्वशी, विश्वामित्र–नदी, यम–यमी, सरमा–पणि, सूर्यासंवादसूक्तानां माध्यमेन आलङ्कारिक–शैल्यां रोचकतया बहुविधरहस्याः समाधत्ताः सन्ति । ऋग्वेदस्य अन्तिमं सूक्तं सङ्गठनसूक्तरूपेण अतीव प्रसिद्धम् । उपनिषत्सु शान्तिमन्त्ररूपेण निगद्यमानस्य **'ओम् सहनाववतु'** इत्यस्य बीजं संज्ञानसूक्ते द्रष्टुं शक्यते । यथा –

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।

देवां भागं यथापूर्वे सं जानाना उपासते ।।[११८]

डॉ. कीजी महोदयः धार्मिकगीतानां संग्रहरूपेण उत्कृष्टकाव्यं मत्वा ऋग्वेदस्य महत्त्वं प्रतिपादयामास।[११९] भारतस्य राष्ट्रपतिः डॉ. राधाकृष्णन् महोदयः भारतीयविचारधारायाः सम्पूर्णज्ञानाय एतेषां सूक्तानामध्ययनं परमावश्यकं मन्यते।[१२०] यदा पर्यन्तं एषा सृष्टिः सकलं जगत्स्थास्यति तावत् पर्यन्तं वेदानां वर्चस्वं अक्षुण्णं भविष्यति । अत एव मोक्षमूलरमहोदयः कथयति –

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।

तावद् ऋग्वेदमहिमा लोकेषु प्रचरिष्यति ।।[१२१]

यजुर्वेदः

नपुंसकलिङ्गवाचकः यजुष् शब्दः √ यज् + उसि योगे यज्ञीयप्रार्थनार्थे मन्त्रार्थे वा निष्पद्यते । यजुष् शब्दस्य इमे अर्थाः भवन्ति –

१) **यजुर्यजतेः** ।[१२२] यज्ञसम्बद्धमन्त्राणां यजुष् संज्ञा भवति ।

२) **इज्यतेऽनेनेति यजुः** । यैः मन्त्रैः यज्ञः क्रियते तद्यजुः ।

३) **अनियताक्षरावसानो यजुः** । यत्र मन्त्रसंख्या निर्धारिता नास्ति तद्यजुः ।

४) **शेषे यजुःशब्दः** ।[१२३] पद्यगीतिरहिता शेषा मन्त्ररचना यजुरिति ।

५) **एकप्रयोजनं साकाङ्क्षं पदजातमेकं यजुः** । एकोद्देश्येन साकाङ्क्षपदसमूहः

यजुः कथ्यते। शतपथब्राह्मणे ✓ यज् यजने, ✓ इण् गतौ, वेगार्थकात् ✓ जू धातोः यज्ञ–गति–वेगार्थेषु यजूषः निष्पत्तिः प्रतिपादिता।[१२४]

अध्वर्युसम्बद्धोऽयं वेदः, एतस्माद् '**आध्वर्यववेदः**' अपि नामधेयम्। सायणाचार्यः यज्ञस्य स्वरूपस्य निष्पादकः वेदः अध्वर्युवेदः इति कथयति।[१२५] यजुर्वेदस्य महत्त्वं ज्ञापयन् आचार्यः कथयति तैत्तिरीयभाष्यभूमिकायाम् –

"भित्तिस्थानीयो यजुर्वेदः , चित्रस्थानावितरौ तस्मात् कर्मसु यजुर्वेदस्यैव प्राधान्यम्। "

यज्ञकर्मकाण्डसम्बन्धितं सकलं विवरणं यजुर्वेदे प्राप्यते।

यजुर्वेदस्य मुख्यः आचार्यः वैशम्पायनः देवता रुद्रः, त्रिष्टुप् छन्दः, भारद्वाजगोत्रं, ताम्रवर्णश्चास्ति इति हेमाद्रिकारः॥[१२६]

यजुर्वेदः कृष्णयजुर्वेदः शुक्लयजुर्वेदः इति भागद्वये विभक्तः। ब्रह्मसम्प्रदायात् कृष्णयजुर्वेदः आदित्यसम्प्रदायाच्च शुक्लयजुर्वेदः सम्बद्धोऽस्ति।

"आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।"

वैयासिकचरणव्यूहभाष्यकारः एतयोर्भेदं स्पष्टयन्नाह – याज्ञवल्क्यः शुक्लवर्णयुक्तात् सूर्यादुपदेशं जग्राह अतः अस्य शुक्लसंज्ञा अथवा वाजसनेयिशाखाध्यायिनः वेदारम्भं चतुर्दशीयुक्तपौर्णमास्यां शुक्लपक्षे चक्रुः अतः शुक्लयजुर्वेदः इति विभागः। तैत्तिरीयशाखाध्यायिनः कृष्णपक्षप्रतिपदायाः युक्तपूर्णिमायां वेदाध्ययनमारभन्ते अतः कृष्णयजुर्वेदः इति संज्ञेभिधीयते। यथा –

"एतत्सखिलं शुक्रियं मध्याह्ने शुक्लवर्णेन सूर्येण दत्तं तच्छुक्लयजुः प्रख्यातमित्यर्थः। वेदोपक्रमणे चतुर्दशीयुक्तपूर्णिमाग्रहणात् शुक्लयजुः, तैत्तिरीयकैर्वेदोपक्रमणे औदयिकपर्वग्रहणादर्यात्कृष्णाप्रतिपद्विद्धपौर्णमासीग्रहणात् कृष्णयजुरिति।"

एतयोः नामकरणे अन्यो हेतुः प्रतिज्ञासूत्रभाष्येऽपि प्रतिपाद्यते। तत्र बुद्धिमालिन्यात् प्रथमं यजुः कृष्णनाम्ना पुनः व्यवस्थितप्रकरणत्वात् शुक्लेति नाम्ना यजुः प्रथितम्।[१२७]

महर्षिपतञ्जलिः व्याकरणमहाभाष्ये यजुर्वेदस्य शतं शाखानामुल्लेखं करोति। एकशतमध्यर्युशाखाः इति।[१२८] सम्प्रति यजुर्वेदस्य षट् शाखाः सन्ति। येषु द्वे शाखे

शुक्लयजुर्वेदस्य चतस्त्रश्च कृष्णयजुर्वेदस्य शाखाः प्रचलन्ति।

शुक्लयजुर्वेदः

१) वाजसनेयी संहिता

अस्याः अपरं नाम माध्यन्दिनसंहिताऽपि वर्तते। एषा संहिता सर्वाधिका प्रचलिता वर्तते। अस्यां चत्वारिंशत् (४०) अध्यायाः, १९७५ मन्त्राः, २,८८,००० अक्षराणि च सन्ति।[१२९]

२) काण्वसंहिता

अत्र चत्वारिंशदध्यायाः (४०), २०८६ मन्त्राश्च सन्ति।

कृष्णयजुर्वेदः

१) तैत्तिरीयसंहिता

अस्यां संहितायां सप्त (७) काण्डानि, चतुश्चत्वारिंशत् (४४) प्रपाठकाः, ६३१ अनुवाकाः, २१९८ कण्डिकाश्च सन्ति।

२) मैत्रायणीसंहिता

संहितायामस्यां चत्वारि (४) काण्डानि, चतुर्पञ्चाशत् (५४) प्रपाठकाः, चतुश्चत्वारिंशदधिककत्रिंशत्शतं (३१४४) मन्त्राः सन्ति।

३) कठसंहिता

अत्र ५ खण्डानि, ८४३ अनुवाकाः, ३०२८ मन्त्राः सन्ति।

४) कपिष्ठलसंहिता

इयं संहिता पूर्णरूपेण नोपलभ्यते। अस्यां ऋग्वेद इव अष्टकानि अध्यायाश्च विभक्ताः सन्ति। षण्शाखासमन्वितस्यास्य यजुर्वेदस्य प्रमुखविषयः कर्मकाण्डं वर्तते। यज्ञकर्मणि प्रयुज्यमानानां मन्त्राणां सङ्कलनं एतस्मिन्वेदे दरीदृश्यते। तदतिरिक्तं मनोवैज्ञानिकतथ्यानाधारीकृत्य शिवसङ्कल्पसूक्ते[१३०] शिवविचारैः युतस्य मनसः प्राप्तेः वर्णनं प्राप्यते। **'यत्र विश्वं भवत्येकनीडम्'**[१३१] आदिमन्त्रेषु समाजवादस्य वर्णनं प्राप्यते। षोडशोऽध्यायः रुद्राध्यायरुपेण प्रथितः लोके एतस्य वेदस्य। चत्वारिंशत्तमस्याध्यायस्य प्रसिद्धिः 'ईशोपनिषद्' नाम्नाऽपि वर्तते। एतस्य प्रथममन्त्रः ईश्वरस्य सर्वव्यापकतां

प्रतिपादयति –

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम् ।।[१३२]

संक्षेपेण न केवलं यजुर्वेदे याज्ञिकक्रियाणां विवेचनमपितु ज्ञानविज्ञानस्य सूक्ष्मातिसूक्ष्माणां तत्त्वानामपि निरूपणं विद्यते इति भावः ।

सामवेदः

'सामन्' शब्दस्यार्थः गीतियुक्ताः मन्त्राः । यः मन्त्रः गीतिसमन्वितः स एव सामेति संज्ञया व्यवहर्तुं क्षमः । सामन् शब्दस्य विविधशास्त्रकृद्भिः एताः परिभाषाः प्रदत्ताः –

१. गीतिषु सामाख्या इति जैमिनिमुनिः ।[१३३] यत्र गीतिमन्त्राः सः सामवेदः ।

२. आंगूष्यं साम इति ऋग्वेदः ।[१३४] तत्र स्तोत्ररूपान् गीतिरूपान् च मन्त्रान् साम कथितम् ।

३. सा च अमश्चेति तत् साम्नः सामत्वम् ।[१३५]

ऋचः स्वरश्च सामेति कथ्येते । ऋक्साम्नोः दम्पतिरूपेण वर्णनं लभते । यथा बृहदारण्यकोपनिषदि अन्यत्र च ।[१३६]

"अमोऽहमस्मि सा त्वं सामाहमस्म्यृक्त्वं द्यौरहं पृथिवी त्वं, ताविह सम्भवाव, प्रजामाजनयावहै ।[१३७]

सामशब्दस्य गेयार्थे एव प्रयोगः इति तथ्यं समर्थयन् विन्टरनित्समहोदयः वदति –

"Samveda samhitas are nothing but collections of texts which have been collected for the uses of udgatras not for their own sake but because of the melodies the bearers of which they were."

यस्मिन्वेदे गीतियुक्तानां मन्त्राणां समाहारः सः सामवेदोऽस्ति । शतपथब्राह्मणे सामवेदस्य वेदानां सारत्वेन कथनं वर्तते ।[१३८] सामवेदं विना यज्ञः अपूर्णः भवति ।[१३९] अत एव महर्षिदयानन्दः यज्ञानन्तरं संस्कारविधौ सामगान (महावाम्यदेवगानम्) निर्दिशति । बृहद्देवताकारः कथयति यः साम वेत्ति सः वेदतत्त्वं वेत्ति ।[१४०] गीतायां योगेश्वरः श्रीकृष्णः

'**वेदानां सामवेदोऽस्मि**'[१४१] इत्युक्त्वा सामवेदस्य महत्त्वं प्रतिपादयति । यथा ऋचां सार: साम साम्न उद्गीथ: रस: भवति अयमुद्गीथ: रस: बहुमूल्य: वर्तते इति छान्दोग्योपनिषद् ।[१४२] सामगानं देवानां स्तुते: प्रसादस्य च सर्वोत्तममुपायं वर्तते ।[१४३] ऋग्वेदेऽपि कथितं यत् सामवेदस्य प्राप्ति: तं भवति य: जागरूक: भवति । यथा –

यो जागार तमृच: कामयन्ते यो जागार तमु सामानि यन्ति ।

यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योका: ॥[१४४]

'**सहस्त्रवर्त्मा सामवेद:**' इति महाभाष्यकारस्य पतञ्जले: कथनेन सामवेदस्य सहस्त्रशाखा: आसन् । चरणव्यूहकार : कथयति – शिष्याणां प्रमादेन अनध्यायदिने च अध्ययनाद् वज्रप्रहारेण सहस्त्रशाखा: विनष्टा:।[१४५]

सामवेदस्य त्रयोदशशाखानामुल्लेख: चरणव्यूहे, जैमिनिगृह्यसूत्रादिषु लभते । साम्प्रतं सामवेदस्य तिस्त्र: शाखा: समुपलभ्यन्ते ।

(१) कौथुमीय शाखा

(२) राणायनीय शाखा

(३) जैमिनीय शाखा

सामवेद: मुख्यत: द्विधा विभक्त: । (१) पूर्वार्चिक: (२) उत्तरार्चिक: । पूर्वार्चिके षट् (६) प्रपाठका: ६५० मन्त्रा: सन्ति । उत्तरार्चिके च नव (९) प्रपाठका: १२२५ मन्त्रा: सन्ति । आहत्य सामवेदे १८७५ मन्त्रा: सन्ति । सामवेदस्य मुख्यविषय: उपासना वर्तते । अत्र अग्नि – इन्द्र – सोमादिदैवै: सम्बद्धा: मन्त्रास्सन्ति । सामवेदे सोम – सोमरस – सोमपान – सोमयागस्य विशिष्टमहत्त्वं निरूपितम्, अत अयं सोमप्रधान: वेद: अपि कथ्यते । यज्ञे उद्गातु: यत्स्थानं तत्स्थानं सामवेदस्य ।

'**अग्न आ याहि वीतये**' इति मन्त्रादारभ्यमाणस्य समापनं इन्द्रस्य स्तुत्या भवति । प्रथमे मन्त्रे शान्तरसे अग्ने: स्तवनं अन्तिमे च वीररसे इन्द्रस्य वर्णनं प्रतिपादितम् । संक्षेपेण कथयितुं शक्यते सामवेद: संगीतमाध्यमेन अपि च शक्तिमाध्यमेन परमात्मन: प्राप्ते: श्रेष्ठोपाय: वरीवर्ति ।

अथर्ववेदः

थर्व कौटिल्ये – हिंसायां धातोः अकुटिले अहिंसार्थे च अथर्व शब्दः व्युत्पद्यते । निरुक्तकारः यास्कः थर्व गतौ चेष्टायां वा धातोः गतिहीनार्थे स्थिरार्थे वाऽथर्वशब्दस्य निष्पत्तिं करोति ।[१४६] यत्र स्थिरतायाः चित्तवृत्तिनिरोधरूपस्य योगस्य उपदेशः वर्तते सः अथर्ववेदः । गोपथब्राह्मणे कथितं यद् यत्र समीपस्थात्मानं स्वात्मनि द्रष्टुं विद्यायाः उपदेशः सः अथर्ववेदः अस्ति ।[१४७]

अङ्गिरावंशीय अर्थवाऋषिः एतं वेदं ददर्श अतः अथर्ववेदः कथ्यते । भृग्वङ्गिरावेदः ब्रह्मवेदनाम्नाऽपि अथर्ववेदः प्रथितः । ऐहिकामुष्मिकयोः फलं यच्छति अथर्ववेदः ।[१४८] अथर्ववेदस्य ज्ञाता यस्मिन्राष्ट्रे वसति तत्र सर्वविधोपद्रवः विनश्यंति इति विद्वांसः ।

यस्य राज्ञो जनपदे अथर्वा शान्तिपारगः ।

निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम् ॥

अथर्ववेदस्य ब्रह्मा देवता अनुष्टुप् छन्दः चास्ति । महाभाष्यकारः अथर्ववेदस्य नवशाखाः उद्धरति । (१) पिप्पलाद (२) स्तोद (३) मोद (४) जलद (५) जाजल (६) शौनकीय (७) ब्रह्मवेद (८) देवदर्श (९) चारणवैद्य । साम्प्रतं शाखाद्वयमेवोपलभ्यते ।

(१) शौनकीय शाखा –

अथर्ववेदस्य शौनकीयशाखायां विंशतिः (२०) काण्डानि ३४ प्रपाठकाः १११ अनुवाकाः, ७३० सूक्तानि ५९८७ मन्त्राश्च सन्ति । इयमेव शाखा सर्वत्र प्रचलति ।

(२) पैप्पलाद शाखा

एषा संहिता अपूर्णा वर्तते । अतः अत्र सूक्तमन्त्रादिगणनमशक्यं भवति ।

अथर्ववेदे मानवजीवनस्य प्रत्येकक्षेत्रस्य परिचयः प्राप्यते । चतुर्वर्णानां , चतुराश्रमाणां, धर्माथकाममोक्षरूपचतुर्वर्गाणां सम्बद्धाः मन्त्राः अथर्ववेदे सन्ति । जीवनं सुखप्रदं निर्मातुं दुःखरहितं च कर्तुं विविधानुष्ठानानां विधानं कृतमस्ति अपि च वाञ्छितफलप्रदाः स्वाध्यायायुप्रदायिनः बहवः मन्त्राः प्रार्थनारूपेण बहुशोऽलोक्यन्ते अथर्ववेदे । एतानि "आमुषमानि सूक्तानि" अभिधीयन्ते ।

अस्मिन्वेदे आध्यात्मिक – दार्शनिक – वैज्ञानिक – आयुर्वेदिक – धार्मिक – राजनैतिक – आर्थिक – शैक्षिकादि विषयाः सूक्ष्मदृष्ट्या विवेचिताः व्याख्याताश्च सन्ति ।

अतः अपूर्ववैशिष्ट्ययुतवेदत्वेनाथर्ववेदस्य परिगणनं क्रियते।

अथर्वपरिशिष्टे[१४९] स्कन्दपुराणे[१५०] च वर्णितं यदथर्ववेदस्य मन्त्राणां जापेन इष्टसिद्धिर्भवति इति। सर्वेषां जनानां कृते अयं वेदः लौकिकपारलौकिकानन्दप्रदः कथितः। प्रो. मुग्धानल महोदयः सभ्यतायाः अध्ययनाय अथर्ववेदे ऋग्वेदादपि अधिका सामग्री सम्प्राप्यते इति कथयति।[१५१]

ब्राह्मणग्रन्थाः

वैदिकसाहित्ये वेदानामनन्तरं ब्राह्मणानि महत्त्वपूर्णानि सन्ति। वैदिककर्मणां वैदिकमन्त्राणां च व्याख्यानग्रन्थाः इमे वेदार्थज्ञानप्रतिपत्तये महत्वपूर्णं भागं भजन्ते। **'मन्त्रब्राह्मणयोर्वेदनामधेयम्' 'मन्त्रब्राह्मणात्मको वेदः'**[१५२] इत्युक्तिद्वयेन ब्राह्मणग्रन्थाः वेदपरिभाषां प्राप्ताः यतोहि ब्राह्मणग्रन्थानामध्ययनं विना वेदज्ञानमतीव दुरूहं सञ्जायते।

✓बृह् धातोः ब्राह्मणशब्दस्य निष्पत्तिः। यस्यार्थः वर्द्धनम्। एतेषु वैदिककर्मणां ज्ञानविज्ञानस्य संवर्द्धनं लभते अतः एतेषां ब्राह्मणमिति नामधेयम्। ब्रह्मशब्दस्य त्रयः अर्थास्सन्ति (१) मन्त्रः[१५३] (२) यज्ञः [१५४] (३) पवित्रज्ञानं च। अनेनाधारेण यत्र मन्त्राणां यज्ञानां पवित्रज्ञानस्य व्याख्याविवरणं चोपलभ्यते तानि ब्राह्मणानि कथ्यन्ते। आचार्य भट्टभास्करः ब्राह्मणानां स्वरूपं वर्णयन्नाह –

"ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः।"[१५५]

वाचस्पति मिश्रः ब्राह्मणानां वर्ण्यविषयं निर्दिशन् पञ्चतत्त्वानां सङ्कलनग्रन्थान् ब्राह्मणानि कथयति।[१५६] एतेषु ब्राह्मणेषु यज्ञानां यज्ञीयप्रक्रियायाश्च सर्वाङ्गीणं विवेचनं लभ्यते। पुनश्च दशप्रतिपाद्यविषयान् शबरस्वामी स्वीयभाष्ये परिगणयति –

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारण-कल्पना।
उपमानं दशैते तु विधयो ब्राह्मणस्य वै॥[१५७]

गद्यात्मकेषु ब्राह्मणेषु विविधानां यागानामाख्यानानामुल्लेखः मिलति। सरलायां सरसायां शैल्यां दार्शनिक-गूढरहस्यानि रोचकतया प्रतिपादितानि सन्ति। प्रो. विन्टनित्समहोदयः भारतीयसाहित्यस्येतिहासे ब्राह्मणग्रन्थानां भागद्वये विभाजनं करोति (१) विधिः अर्थात् नियमाः (२) अर्थवादः अर्थात् प्रशस्तिपूर्णा व्याख्या।

सम्प्रति यानि ब्राह्मणान्युपलभ्यन्ते तेषां संक्षेपतः उल्लेखो विधीयते।

ऋग्वेदीय ब्राह्मणानि

(१) ऐतरेयब्राह्मणम्

महर्षि ऐतरेयविरचितेऽस्मिन् ४० अध्यायाः ८ पञ्चिकाः, २८५ कण्डिकाश्च सन्ति। अत्र सोमयागस्य विशेषतो वर्णनमस्ति। शुनःशेपाख्यानकारणेन वैदिकसमाजे चिरस्मरणीयमिदं ब्राह्मणं '**चरैवेति चरैवेति**'[१५८] इति शिक्षां प्रददाति।

(२) शांखायनब्राह्मणम्

कौषितकीब्राह्मणं नाम्नाऽपि ज्ञायमानं ब्राह्मणमिदं ३० अध्यायेषु २२६ खण्डेषु च विभाजितम्। उत्तरे गुर्जरेदेशे एतस्य प्रसारः आसीदिति विविच्यते।[१५९] अत्र रुद्रस्य महिमानं वर्ण्य ज्येष्ठत्वेन श्रेष्ठत्वेन देवानामिति प्रतिपादितम्।[१६०]

यजुर्वेदीय ब्राह्मणानि

शुक्लयजुर्वेदः

(१) शतपथब्राह्मणम्

ब्राह्मणग्रन्थेषु सर्वाधिकं व्यापकं, महत्त्वपूर्णं, प्रसिद्धं, यागानुष्ठानस्य च प्रतिपादकं शतपथब्राह्मणं शुक्लयजुर्वेदस्य माध्यन्दिनकाण्वयोः शाखयोः लभते। माध्यन्दिनशतपथे १४ काण्डानि, १०० अध्यायाः ६८ प्रपाठकाः , ४३८ ब्राह्मणानि, ७६२४ कण्डिकाश्च सन्ति। काण्वशतपथे १७ काण्डाः , १०४ अध्यायाः, ४३५ ब्राह्मणानि, ६८०८ कण्डिकाः सन्ति। राजसूयाश्वमेधदर्शपौर्णमासवाजपेयादियागानां विस्तृतं विवरणं शतपथब्राह्मणे प्राप्यते।

कृष्णयजुर्वेदः

(२) तैत्तिरीयब्राह्मणम्

कृष्णयजुर्वेदीयः अयं ब्राह्मणग्रन्थः सस्वरं समुपलभ्यते। दक्षिणभारते एतस्य व्यापकः प्रचारः आसीत्। डॉ. बर्नेलमहोदयानुसारं तत्र किम्वदन्ती वर्तते यत् दक्षिणभारतस्य बिडालाः अपि तैत्तिरीयशाखया परिचिताः भवन्ति। सायणाचार्यः अपि एतस्या एव शाखाया अवर्तत। अत्र त्रीणि काण्डानि सन्ति यानि क्रमशः ८,८,१२ अध्यायेषु विभक्तानि सन्ति।

सामवेदीयब्राह्मणानि

सामवेदस्य सर्वाधिकानि नवब्राह्मणानि प्राप्यन्ते । तेषु विविधानां यागानां अपि च सामगानस्य महत्वं प्रतिपादितम् । केवलमेतेषां नामोल्लेखः क्रियते ।

(१) ताण्ड्यमहाब्राह्मणम् (पञ्चविंशब्राह्मणम्)

(२) षड्विंशब्राह्मणम्

(३) जैमिनीयब्राह्मणम्

(४) सामविधानब्राह्मणम्

(५) आर्षेयब्राह्मणम्

(६) दैवतब्राह्मणम्

(७) उपनिषद्ब्राह्मणम् (छान्दोग्यब्राह्मणम्)

(८) संहितोपनिषद्ब्राह्मणम्

(९) वंशब्राह्मणम्

अथर्ववेदीयब्राह्मणम्

(१) गोपथब्राह्मणम्

गोपथऋषिप्रणीतमिदं ब्राह्मणं पूर्व – उत्तर इति द्वयोः भागयोः विभक्तं वर्तते । पूर्वगोपथे ५ अध्यायाः, उत्तरगोपथे च ६ अध्यायाः सन्ति । आहत्य २४८ कण्डिकास्सन्ति । डॉ. सूर्यकान्तः सरमा–पणि संवादे पणीनां गौचोरणं अङ्गिरसां साहाय्येन इन्द्रस्य गवां पथान्वेषणमेव गोपथस्य रहस्यमिति निरूपयति ।[१६१] अत्र अथर्ववेदस्य उद्गीथस्य बहुशः वर्णनमवलोक्यते ।

आरण्यककग्रन्थाः

'**अरण्ये भवम् आरण्यकम्**' इति व्युत्पत्या आरण्यग्रन्थानामध्ययनं मननं च अरण्ये भवति स्म । सायणाचार्यः अपि अयमेवार्थः तैत्तिरीयारण्यकस्य भाष्ये प्रतिपादयति ।

अरण्यादध्ययनादेतद् आरण्यकमितीर्यते ।

अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते ॥[१६२]

आरण्यकानां मुख्यविषयः यज्ञेषु निहितानाम् आध्यात्मिकतथ्यानां विश्लेषणम् अस्ति। यथा औषधेभ्यः अमृतस्य तथैव वेदेभ्यः आरण्यकस्य उत्पत्तिः इति कृष्णद्वैपायनव्यासः महाभारते कथयामास।[१६३]

एते ग्रन्थाः मुख्यतः गृहस्थजीवनात् निवृत्तानां वानप्रस्थिनां कृते सन्ति। ये वनेषु वासं कृत्वा मननं, चिन्तनं, स्वाध्यायं, तपः, धार्मिककार्याणि च कुर्वन्ति स्म। अत्र यज्ञस्य दार्शनिकरूपम्, आत्मविवेचनं, तत्त्वमीमांसा, ज्ञानकर्मोपासनानां समन्वयः वर्णाश्रमधर्माः, निष्काम-कर्मयोग, प्राणविद्यादिविषयाणां मार्मिकं विशदञ्च वर्णनमुपलभ्यते।

यथा कौषीतकि आरण्यके कथितम् -"**यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः।**"[१६४] अत्र प्राणविद्यायाः विशेषतो वर्णनमस्ति। तथैव ऐतरेयारण्यकेऽपि प्राणविद्यायाः उल्लेखः इत्थं वर्तते-"**सर्वा ऋचः सर्वे वेदा, सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्।**"[१६५]

आरण्यकग्रन्थाः उपनिषदां पूर्वरूपास्सन्ति। उपनिषत्सु आत्मनः परब्रह्मण-सृष्ट्युत्पत्तेः - ज्ञानस्य कर्मणः उपासनायाश्च प्रतिपादनमस्ति। तस्यैव तत्त्वचिन्तनस्य प्रारम्भः आरण्यकेषु दृश्यते।

आरण्यकानां संख्या

- ऋग्वेदीयारण्यकानि द्वे स्तः -

(१) ऐतरेयारण्यकम् (२) शाङ्खायनारण्यकम्

- यजुर्वेदीयारण्यकानि त्रीणि सन्ति -

यथा- शुक्लयजुर्वेदस्य बृहदारण्यकम्, कृष्णयजुर्वेदस्य च तैत्तिरीयारण्यकम् मैत्रायणी आरण्यकञ्च

- सामवेदस्य आरण्यकद्वयं वर्तते।

(१) जैमिनीयोपनिषद् (तवलकार)

(२) छान्दोग्योपनिषद्

- अथर्ववेदस्य एकमप्यारण्यकं नोपलभ्यते।

उपनिषदः

उप + नि उपसर्गपूर्वकात् सद्धातोः उपनिषद् शब्दस्य निष्पतिः। उप = समीपे नि = निश्चयेन, सद् = स्थानम् इति। अस्यार्थः तत्त्वज्ञानाय गुरोः समीपे सविनयं स्थितिः उपनिषदित्युच्यते। तत्वज्ञानप्रतिपादकत्वात् एताः 'उपनिषदः' कथ्यन्ते। ब्रह्मविद्यायाः द्वितीयं नाम अपि उपनिषदिति।

सद्धातोः त्रयः अर्था भवन्ति (१) विशरणम् (२) गतिः (३) अवसादनम् च। श्रीमच्छङ्कराचार्यः एतानर्थान् आश्रित्यैव अविद्यानाशनं दुःखनिरोधः ब्रह्मप्राप्तिश्च उपनिषदाम् अर्थः इति स्वीकरोति। उपनिषदां परिशीलनेन मुमुक्षोः अविद्या नश्यति येन ब्रह्मणः प्राप्तिर्भवति जनानाञ्च त्रिविधदुःखानां नाशो भवति।[१६६]

उपनिषदां सङ्ख्या

प्राचीनकाले प्रतिवैदिकशाखायाः पृथक् पृथक् उपनिषदासीत् परमिदानीं न तादृशी स्थितिः। एतस्मादेव कारणात् उपनिषदां सङ्ख्याविषये भिन्नमतानि अवलोक्यन्ते साम्प्रतम्। केचन सुधियः (२००) द्विशतम् उपनिषदः मन्यन्ते। मुक्तिकोपनिषदि १०८ उपनिषदः प्रतिपादितास्सन्ति। येषु १० ऋग्वेदस्य, १९ शुक्लयजुर्वेदस्य, ३२ कृष्णयजुर्वेदस्य, १६ सामवेदस्य, ३१ अथर्ववेदस्य सन्ति। तथापि प्रमुखास्तु एकादश (११) उपनिषदः एव इत्यत्र प्रायशः विदूषामैकमत्यम्।

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरः।
छान्दोग्यम्-एतरेयं च बृहदारण्यकं दश। श्वेताश्वतरम् एकादश॥

श्रीमच्छङ्कराचार्योऽपि एताः प्रमुखाः मत्वा एतासामेव उपनिषदां भाष्यमकरोत्। वेदानुसारं विद्वांसः इत्थमुपनिषदां विभाजनं कुर्वन्ति –

ऋग्वेदीयोपनिषदः – ऐतरेयोपनिषद्, कौषीतकि उपनिषद्, वाष्कलोपनिषद्।

यजुर्वेदीयोपनिषदः – शुक्लयजुर्वेदस्य– ईशोपनिषद्, बृहदारण्यकोपनिषद्।

कृष्णयजुर्वेदस्य – कठोपनिषद्, तैत्तिरीयोपनिषद्, श्वेताश्वतरोपनिषद्, मैत्रायणी उपनिषद्।

सामवेदीयोपनिषदौ – छान्दोग्योपनिषद्, केनोपनिषद्।

अथर्ववेदीयोपनिषदः– मुण्डकोपनिषद्, प्रश्नोपनिषद्, माण्डूक्योपनिषद्।

वेदानन्तरम् आरण्कग्रन्थेषु यस्याः आध्यात्मिकजिज्ञासायाः मनन-चिन्तनस्य स्वानुभूतेश्च या प्रक्रिया विकसिता तस्याः सुव्यवस्थितं परिपक्वं च रूपमुपनिषत्सु द्रष्टुं शक्यते। दार्शनिकतत्त्वैः प्रपूरितासु एतासु उपनिषत्सु मुख्यतया ब्रह्म-स्वरूपं, प्राण-सिद्धान्तः, पुनर्जन्म, विद्या-अविद्या, सम्भूति-असम्भूत्यादिविषयाः प्रतिपादिताः वर्तन्ते।

वेदाङ्गानि

वेदार्थावबोधाय स्वरूपनिर्णये यान्यतीवोपकारकाणि शास्त्राणि सन्ति तानि वेदाङ्गानि इति उच्यन्ते । अङ्ग्यन्ते ज्ञायन्ते अमीभिः इति अङ्गानीत्यनया व्युत्पत्याऽङ्गशब्दस्योपकारकोऽर्थोऽस्ति। येन कस्यापि पदार्थस्य पारमार्थिकस्वरूपनिर्णयो भवति तदेवाङ्गमित्युच्यते। षडिमानि वेदाङ्गानि - (१) शिक्षा (२) व्याकरणम् (३) छन्दः (४) निरुक्तम् (५) ज्योतिषम् (६) कल्पः। तथोच्यते -

''शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।।[१६७]

षण्णाम् एतेषां महत्त्वं निरीक्ष्यैव पाणिनीयशिक्षायां प्रतिपाद्यते यत् -

छन्दः पादौ तु वेदस्य हस्तो कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[१६८]

एतानि वेदाङ्गानि वेदानां सम्यगवबोधनार्थं प्रवृत्तानि। वेदाङ्गानां ज्ञानं विना वेदार्थः प्रतिपत्तुं नैव शक्यते। अतः वेदानां स्वरूपमहत्त्वनिरूपणमेव वेदाङ्गानां चरमः खलूद्देश्यः ।

वेदानां स्वरूपसंरक्षणपूर्वकं वेदार्थज्ञानावबोधञ्च वेदाङ्गानां हि अन्यतमं प्रयोजनम्। एतेषां षड्वेदाङ्गानाम् उल्लेखो गोपथब्राह्मणे,[१६९] बौधायन-धर्मसूत्रे,[१७०] गौतमधर्मसूत्रे,[१७१] रामायण[१७२] प्रभृतिषु चात्यन्तप्राचीनार्वाचीनेषु ग्रन्थेषु समुपलभ्यते।

माण्डूक्योपनिषदि ''**द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।**''[१७३] एतेषां वेदाङ्गानां विवरणं समासेन अत्र प्रस्तूयते -

१. शिक्षा -

"वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः । इत्युक्तः शिक्षाध्यायः ।"[१७४]

शिक्षाग्रन्था वर्णोच्चारणविधिं विशेषतो वर्णयन्ति । उच्यते च पाणिनीयशिक्षायाम् -

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।

धैर्यं लयसमर्थं च षडेते पाठकाः गुणाः ॥[१७५]

"स्वरवर्णाद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा ।"[१७६]

"शिक्षां व्याख्यास्यामः वर्णः, स्वरः, मात्रा, बलम्,

साम, सन्तानः इत्युक्तः शिक्षाध्यायः ।"[१७७]

इदानीम् उपलभ्यमानेषु ३२ शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रमुखा । इतरे च विशिष्टाः शिक्षाग्रन्थाः सन्ति-याज्ञवल्क्यशिक्षा, व्यासशिक्षा, नारदशिक्षा, माण्डूकीशिक्षा चेति । "शिक्षा घ्राणं तु वेदस्य" वर्णोच्चारणादिविधिज्ञानं विना वेदानां विशुद्धः पाठोऽर्थावगमश्चेति न भवितुमर्हति ।

२. व्याकरणम्-

व्याक्रियन्ते विविच्यन्ते शब्दाः अनेनेति व्याकरणम् ।

षडङ्गेषु व्याकरणमेव प्रधानम् । "**प्रधानं च षट्सु अङ्गेषु व्याकरणम्**"[१७८] निरुक्तस्यादौ यास्केनोक्तं यत् "**अतिप्राचीनकाले वेदाङ्गान्यपि ऋषिभिः प्रणीतानि** ।"[१७९]

मुण्डकोषनिषदः प्रारम्भे महर्षिराङ्गिरसः षडङ्गानीति शौनकमाह "**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम् इति** ।"[१८०]

अन्यच्च शाकलप्रातिशाख्ये -

शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां चयः ।

ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु ॥[१८१]

भगवान् शङ्कराचार्यः छान्दोग्योपनिषद्भाष्ये - "**वेदानां वेदः**"[१८२] इत्यस्यार्थं व्याकरणमिति चकार ।

वेदाध्ययने तु सर्वतोभावेन व्याकरणस्य महत्त्वं निर्विवादमेव। "**एवं हि श्रूयते बृहस्पतिरीन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्त्रमध्ययनकालो न चान्तं जगाम, किं पुनरद्यत्वे यः सर्वथा चिरं जीवति वर्षशतं जीवति॥**"

एवं महाभाष्यकारेण भगवता पतञ्जलिनापि लिखितम्-रक्षार्थं वेदानां, ऊहः, आगमः, लध्वर्थं, असन्देहार्थं च वेदाङ्गानां महत्त्वपूर्णं स्थानं वर्तते। "**मुखं व्याकरणं स्मृतम्**"[१८३] व्याकरणं विना वेदपुरुषस्य शरीररक्षणमपि सर्वथाऽसम्भवम्। अत एव व्याकरणस्य ज्ञानं वेदाध्ययने आवश्यकमेव।

"**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।**"

"**प्रधानं च षडङ्गेषु व्याकरणम्**"[१८४]

३. कल्पः – कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते। मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि चतुर्धा विभज्यन्ते –

१) श्रौतसूत्रम् २) गृह्यसूत्रम् ३) धर्मसूत्रम् ४) शुल्बसूत्रम् च।

अतः वेदविहितश्रुतिप्रतिपादितयज्ञयागादिविधानतद्विवरणप्रतिपादकाः ग्रन्थाः श्रौतसूत्राणि व्यपदिश्यन्ते। श्रुतिमूलकत्वात् गृह्यसूत्राणि तानि सन्ति येषु गृहाश्रमिणां षोडशसंस्कारादयः उपदिश्यन्ते। धर्मसूत्राणि तानि भवन्ति येषु मानवानां कर्तव्याकत्तव्यं नीतिधर्मो अन्यच्च पारमार्थिकाः, सामाजिकाः, धर्मविशेषाः, नियमाः व्यपदिश्यन्ते। शुल्बसूत्रेषु यज्ञवेद्याः मानादिकं वेदीनिर्माणविध्यादिकं च वर्ण्यते।

"**हस्तौ कल्पोऽथ पठ्यते**"[१८५]

४. छन्दः – "**छन्दः पादौ तु वेदस्य**"[१८६] इति शिक्षायां प्रतिपादितम्। वेदेषु मन्त्राः प्रायशः छन्दोबद्धा एव। अतो वृत्तज्ञानाय छन्दःशास्त्रम् आवश्यकम्। यास्काचार्येण एवं लिखितम् – "छन्दांसि छादनात्"[१८७] साम्प्रत तु पिङ्गलाचार्यप्रणीतं छन्दशास्त्रम् एव वेदाङ्गत्वेन स्वीकृतं मन्यते उपलभ्यते च।

५. निरुक्तम् –"**निरुक्तं श्रौत्रमुच्यते**"[१८८] अस्मिन् ग्रन्थे क्लिष्टवैदिकशब्दानां निर्वचनं समुपलभ्यते। निरुक्ते काण्डत्रयं नैघण्टुकाण्डं, नैगमकाण्डं, दैवतकाण्डं चेति। निरुक्तस्य पञ्चविधकार्यत्वम्। यथा

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥[१८९]

आचार्य सायणः निरुक्तस्य लक्षणम् एवं करोति – **"अर्थावबाधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"** ।

६. ज्योतिषम् – **"ज्योतिषामयनं चक्षुः"**[१९०] ज्योतिषशास्त्रं वेदपुरुषस्य नेत्ररूपेण वर्तते ।

"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद वेदम् ॥"[१९१]

"वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राज्य आदधीत ।

शरदि वैश्य आदधीत ।"[१९२]

"यो ज्योतिषं वेद स वेद यज्ञम्"[१९३]

"यथा शिखा मयूराणां, नागानां मणयो यथा ।

तद्वत् वेदाङ्गशास्त्राणां, गणितं मूर्धनि स्थितम् ॥"[१९४]

अर्थात् शुभमुहूर्तम् आश्रित्येव विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्ताकलनाय ज्योतिषस्योदयोऽभवत्। अत्र सूर्यचन्द्रमसोः ग्रहाणां नक्षत्राणां च गतिः निरीक्ष्यते परीक्ष्यते विविच्यते च। अतः समस्तेषु अङ्गेषु प्राधान्यं नेत्रयोः वर्तते। यतो हि अन्यैः समस्ताङ्गैः युक्तोऽपि मानवो यदि नेत्रहीनः तर्हि किमपि कर्म कर्तुं समर्थो न भवति। एवमेवेदं ज्योतिषशास्त्रं प्रकाशशास्त्रस्य विज्ञानस्वरूपं वर्तते। जीवमात्रकृतेऽनुभवगम्यं शास्त्रमस्ति।

वेदानां प्रतिपाद्यविषयः

यदा वयं भारतीयाः एतत्स्वीकुर्मः यत् इमे वेदाः केनापि पुरुषेण न रचिताः ईश्वरनिर्मिताः सन्ति अपौरुषेयाः सन्ति चेत् ईश्वररचितेषु वेदेषु सर्वविषयाः वर्णिताः एव स्युः। अत एव 'सर्वज्ञानमयो हि सः' इत्यादिना वाक्येन वेदस्य विषयव्यापकत्वं सूच्यते। वेदानां प्रतिपाद्यविषयाः शब्देषु वाक्येषु लेखेषु च सीमिताः न भवितुं शक्नुवन्ति । महाभारतसन्दर्भे यथा '**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्**' इत्युक्तिः वर्तते इयं भणितिः वेदानां सन्दर्भेऽपि उपयुक्ता एव। वेदानां विषये अयं श्लोकः लोकविश्रुतः एव –

वेदेषु विविधाः विद्याः वेदेषु विविधाः कलाः ।

वेदेषु ज्ञेयं विज्ञानं वेदेषु किन्न विद्यते ॥

अनादिकालत एव विश्वस्य सर्वेऽपि जनाः एतेभ्यः वेदेभ्यः एव चरित्रं, व्यवहारं, धर्मं चाशिक्षन्त ।[१९५] वेदेषु कलाः, विज्ञानं, दर्शनं, समाजः, इतिहासः, अर्थशास्त्रम्, राजनीतिः, अध्यात्मम्, संस्कृतिः, यज्ञादिविषयाः पदे-पदे अवलोक्यन्ते । यत्र भौतिकं बाह्यं ज्ञानं वेदेषु विद्यते तत्रैव आध्यात्मिकमाभ्यन्तरं ज्ञानमपि वेदेषु विद्यते । परमात्मा-जीवात्मा-जगत्-पुनर्जन्म-परलोकादीनां गूढरहस्यानामपि विचारः वेदेष्वेमेषु प्रकटीकृतः । विषयाः एतावत् विस्तीर्णाः व्यापकाः सन्ति तेनैव कारणेन वेदानां मन्त्राणां त्रिविधां चतुर्विधां वा व्याख्यां ऋषयः चक्रुः । यास्काचार्यमतेन मन्त्राणां आधिभौतिकी, आधिदैविकी, आध्यात्मिकी, याज्ञिकी वा व्याख्या कर्तुं शक्यते । महर्षिः दयानन्दः ऋग्वेदादिभाष्यभूमिकायां वेदस्य विषये ईश्वर-जीव-प्रकृति-विमानशास्त्र-विज्ञान-पुनर्जन्म- मोक्षादिविषयान्गृह्णाति । प्रत्यक्षरूपेण अनुमानप्रमाणेन च येषां विषयाणां ज्ञानं न भवति तेषां कृते वेदाः आप्तप्रमाणरूपाः सिद्ध्यन्ति । स्थूलात्स्थूलतमं सूक्ष्मात्सूक्ष्मतमं च ज्ञानं वेदेषु द्रष्टुं शक्यते । वेदाः चक्षुरूपाः सन्ति अतः वेदचक्षुषा सर्वं किमपि रहस्यं उद्घाटयितुं शक्यते । कर्मपुनर्जन्मनोः विषयेऽपि वेदेषु यत्र तत्र सर्वत्र निरूप्यते ऋषिभिः । मनुष्यस्य चतुर्विधानां पुरुषार्थानां धर्म-अर्थ-काम-मोक्षाणां विषये वेदाः निर्दिशन्ति । तत्रापि मोक्षरूपस्य पुरुषार्थस्य प्राप्तये उपायाः वेदेषु समुपलभ्यन्ते । ईश्वरज्ञानं ब्रह्मविद्या तत्र वेदेषु सर्वप्रमुखविषयत्वेन स्वीकर्तुं शक्यते यतः वेदेतरे वैदिकसाहित्ये ब्रह्मणः एव निरूपणं सर्वप्रमुखत्वेनावलोक्यते ।[१९६] तदनन्तरं वेदानां द्वितीयः प्रतिपाद्यविषयः यज्ञादीनि शुभानुष्ठानानि वर्तन्ते येषां माध्यमेन मनुष्यः स्वर्गलोकं प्राप्नोति । विविधानां यज्ञानां माध्यमेन मनुष्यः निजकल्याणं तु करोत्येव तेन सहैव परहितं परोपकारः अपि यज्ञादिना क्रियते एव । अथर्ववेदे ऋषिणा एतस्य ब्रह्मज्ञानस्य महत्त्वं प्रतिपादयन् कथ्यते –

स ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः ।

यस्तन्न वेद किमृचा करिष्यति य इद् तद्विदुस्ते इमे समासते ॥ [१९७]

वेदानां प्रतिपाद्यविषयः सः अविनाशी सर्वरक्षकः आकाश इव सर्वव्यापकः निर्लिप्तब्रह्म एव वर्तते । यः सूर्यादिदेवानामाश्रयस्थानं वर्तते, यः वेदादिशास्त्राण्यधीत्यापि ब्रह्मज्ञानं न प्राप्नोति सः शब्दशास्त्राणि पठित्वा किं करिष्यति ? अतः

ब्रह्मज्ञानप्रतिपादनमेव वेदानां मुख्यप्रतिपाद्यविषयः । य एतं ब्रह्म वेत्ति स मोक्षत्वं प्राप्नोति। यदुच्यते अथर्ववेदेऽपि –

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।

तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ॥ [१९८]

अपि च –

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः ।

तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥ [१९९]

अयं ब्रह्म सर्वतो व्याप्य स्थितः वर्तते। इदं ब्रह्ममयं जगदतः एषः ब्रह्म विश्वस्य सर्वान् लोकान्, जनान्, सम्यक्रूपेण आपश्यति, प्रतिपश्यति, परापश्यति, पश्यतीति अथर्ववेदः । [२००] प्रत्येकेन मनुष्येन अतः ब्रह्म ज्ञातव्यम् मन्तव्यम् निदिध्यासितव्यम् ब्रह्मज्ञानमेव सर्वेषां मानवानां प्रमुखं कर्तव्यं वर्तते। [२०१]

ऋग्वेदस्य प्रतिपाद्यविषयः

ऋग्वेदस्य प्रतिपाद्यविषयः ज्ञानं वर्तते । ज्ञानप्रधानोऽयं वेदः महर्षिदयानन्देन निगदितः । भारतीयसंस्कृतेः मूलं अस्मिन्वेदे अन्वेष्टुं शक्यते । सामाजिक–आर्थिक–दार्शनिक कलात्मक–शैक्षिक– नैतिकव्यवस्थायाः सुन्दरं वर्णनं ऋग्वेदे द्रष्टुं शक्यते । ऋग्वेदे प्रमुखतः देवानां स्तवनं विद्यते । अग्नि– इन्द्र–वरुण–रुद्रादीनां देवानां स्तुत्या यशसः श्रियः विद्यायाश्च प्राप्तिः बहुषु मन्त्रेषु सूचिता । केषाञ्चित् नैतिकविषयाणां स्पष्टतायै आख्यानान्यपि तत्र प्रयुक्तानि । मनोविज्ञान–सृष्टिरचना–आयुर्वेद–भाषाविज्ञानादीभिः विषयैः सम्बद्धा सामग्री ऋग्वेदे द्रष्टुं शक्यते। हिरण्यगर्भ–नासदीय–पुरुषसूक्तानि सृष्टिप्रक्रियायाः विवेचनं कुर्वन्ति। आचार–नीति–धर्म–कर्तव्यशिक्षायाः वर्णनानि पदे पदे ऋग्वेदे प्राप्यन्ते।

यजुर्वेदस्य प्रतिपाद्यविषय :

यजुर्वेदस्य प्रमुखः विषयः कर्मकाण्डं विद्यते । कर्मकाण्डप्रधानेऽस्मिन्वेदे विभिन्नयज्ञानां तेषां विधेश्च मन्त्राः सन्ति। स्वर्गप्राप्तेः कृते धनवृद्धेः कृते, राज्यविस्तारस्य कृते, मेधावृद्धेः कृते च क्रियमाणानि कर्माणि यजुर्वेदे निर्दिष्टानि सन्ति। सामान्यजीवने एतस्य वेदस्य महदुपयोगः वर्तते । तेन सहैव अन्येऽपि विषयाः अत्र प्रसङ्गानुरुपं

प्रतिपादितास्सन्ति । पुरुषसूक्तं, शिवसङ्कल्पसूक्तं, ईशोपनिषद्, प्रजापतिसूक्तम् इत्यादिभिर्सूक्तैः यजुर्वेदः अत्यन्तं प्रसिद्धिं प्राप्तः वर्तते। अतः अनेन सिद्धं कर्मविषयत्वं यजुर्वेदस्य।

सामवेदस्य प्रतिपाद्यविषयः

सामवेदः प्रमुखतः उपासनाविषयमाश्रयते। विविधदेवानां इन्द्राग्निसोमवरुणादिभिः सम्बद्धानां मन्त्राणामत्र सङ्कलनं वर्तते । सङ्गीतप्रधानोऽयं सामवेदः । सङ्गीतमाध्यमेन सामगाननाम्ना विशिष्टेन प्रकारेण अत्र मन्त्राणां गानं क्रियते । सोमदेवः तत्र परमात्मनः वाचकः वर्तते यस्य स्तुत्योपासनया च परमात्मनः प्राप्तिर्लक्ष्यभूता वर्तते। तत्र परमात्मनः प्राप्तेः कृते सङ्गीतस्य अनिवार्यावश्यकता प्रतिपादिता।

वर्ण्यविषयदृष्ट्या विचार्यते चेत् सामवेदः शान्तरसेन प्रारभते। '**अग्न आ याहि**' इति मन्त्रेण अग्निस्तवनं भवति परन्तु समापनं वीररसेन भवति इत्यस्य वेदस्य वैशिष्ट्यम्। अत्र इन्द्रः योद्धारूपेण मन्त्रे वर्णितः, सः शत्रुभिर्सह युध्यते पुनश्च तान्जयति। अस्याभिप्रायः अयमेव यत् सामवेदः अध्यात्म प्राप्तयेऽपि वीररसं सक्रियतां सङ्घर्षं च अनिवार्यरूपेण अपेक्षितं मन्यते। आकारदृष्ट्या लघु परन्तु प्रसिद्धिदृष्ट्या सामवेदः प्रमुखः परिगण्यते।[२०२]

अथर्ववेदस्य प्रतिपाद्यविषयः

अथर्ववेदस्य प्रमुखः विषयः विविधं ज्ञानं विज्ञानं च वर्तते। सर्वविषयैः सम्बद्धाः मन्त्राः अस्मिन्वेदे समुपलभ्यन्ते। रोगनिवारण-शत्रुनाशन-दीर्घायुष्यप्राप्तिः-पापमोचन-ब्रह्मविद्या-ब्रह्मचर्य- विवाहसंस्कार-यज्ञ-राष्ट्रभक्त्यादिविषयैः अथर्ववेदः समृद्धः अवलोक्यते । पर्जन्यसूक्तम्-ब्रह्मचर्यसूक्तम्- भूमिसूक्तम्-राष्ट्राभिवर्धनसूक्तम्-कालसूक्तम्-ब्रह्मविद्यासूक्तादीनि अथर्ववेदस्य शोभां वर्धयन्ति।

*****

सन्दर्भाः

१. नास्ति वेदात्परं शास्त्रम् । अत्रि स्मृतिः

२. मनुस्मृतिः – २.७

३. महाभाष्यम् – पस्पशाह्निकम् ९

४. अथर्ववेदः – १०.०८.३२

५. वेदोऽखिलो धर्ममूलम् । मनु. २.६

६. आर्यसमाजस्य नियमाः – ३

७. वैदिक साहित्य एवं संस्कृति – डॉ. कपिलदेव द्विवेदी पृ. ३

८. याज्ञवल्क्यस्मृतिः – १.८

९. नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ पूर्व मीमांसा १.१.१८

१०. वैदिक वाङ्मय का इतिहास भगवद्दत्त, प्रथम भाग अध्याय – २

११. अर्थसङ्ग्रहः

१२. मनुस्मृतिः – १२.९६

१३. आचार्य सायणः– ऐतरेयब्राह्मणभाष्यभूमिका ।

१४. मनुस्मृतिः – २.१६६

१५. मनुस्मृतिः – २.१६८

१६. अनन्ता वै वेदाः ॥ तैत्तिरीयब्राह्मणम् ३.१०.११.४

१७. प्रामाण्यबुद्धिर्वेदेषु ॥

१८. धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ मनुस्मृतिः – २.१३

१९. वेदश्चक्षुः सनातनम् । तदेव १२.९४

२०. तदेव – १२.९७

२१. विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः ॥ ऋक्प्रातिशाख्यम् – आचार्य विष्णुमित्रः

२२. वेदपरिचय, कृष्णलाल, पृ.१

२३. पाणिनीय धातुपाठः ।

२४. ऋग्वेदादिभाष्यभूमिका – वेदोत्पत्तिविषयः ।

२५. तैत्तिरीय संहिताभाष्यभूमिका ।

२६. वेदमीमांसा – स्वामी विद्यानन्द सरस्वती

२७. वैदिक साहित्य एवं संस्कृति – बलदेव उपाध्याय पृ. ३

२८. प्राचीन भारतीय संस्कृति – डॉ. राजछत्र मिश्र पृ. ८१

२९. संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला पृ. ७४

३०. संस्कृत साहित्य का समीक्षात्मक इतिहास – डॉ. कपिलदेव द्विवेदी पृ. २३

३१. It is here not a matter of Canon which might have been fixed at some council, the belief in the sacredness of this literature arose, as it was spontaneously and was seldom disputed. - History of indian literatore M. Winternitz

३२. ऋग्वेदादिभाष्यभूमिका – वेदोत्पत्तिविषयः

३३. वैदिक साहित्य – एक विवेचन, डॉ. वेदप्रकाश उपाध्यायः, पृ. ११

३४. यावन्तं ह वा इमां पृथिवीं वित्तेन पूर्णां ददत् लोकं जयति, त्रिस्तावन्तं जयति, भूयांसं चाक्षय्यम्, य एवं विद्वान् अहरहः स्वाध्यायमधीते । तस्मात् स्वाध्यायोऽध्येतव्यः ॥ शतपथ ब्रा. ११.५.६.३ तः ७

३५. वैदिक साहित्य का इतिहास, श्री गजानन शास्त्री मुसलगाँवकर एवं पं. राजेश्वर केशवशास्त्री मुसलगाँवकर, पृ. ३

३६. यजुर्वेदः अ. ३१.७

३७. यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन् ।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम् ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥ अथर्व. – १०.२३.४.२०

३८. शत. ब्रा. १४.५.४.१०

३९. यजुर्वेदः – २६.२

४०. यजुर्वेदः – ३४.५७

४१. बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत् प्रैणा तदेषां निहितं गुहाभिः ॥ ऋ. १०.७१.१

४२. यजु. – १८.२९

४३. यजु. ३६.१ – शा. श्रौ. ६.२.२

४४. ऋ. – ८.७५.६

४५. यजु. – १२.४

४६. यजु. – १८.६७

४७. अथर्व. – ११.७.५

४८. अथर्व. – १५.६.७

४९. अथर्व – १२.१.३८

५०. अथर्व. – ११.७.२४

५१. ऋ. – ४.५८.३

५२. साम. – ३८८.१०२५

५३. अथर्व. – ४.३५.६

५४. अथर्व. – १०.८.३३

५५. एत. ब्रा. – २५.९

५६. मुण्ड. उ. – १.१.५

५७. छां. उ. – ७.७.१

५८. मनु. – १.२३

५९. महाभाष्य पस्पशाह्निक

६०. वा.रामा. –कि.का. – ३.२८

६१. महाभारत. शा. प. २३५

६२. वेदैश्चतुर्भिः सुप्रीता प्राप्नुवन्ति दिवौकसः ।
हव्यं कव्यं च विविधं निष्पूर्तं हुतमेव च ॥ तत्रैव द्रो. प. २१.२२

६३. तत्रैव–स.प. १२.३१

६४. तत्रैव–व.प. २१५.२२

६५. तत्रैव–व.प. १८७.१८

६६. हरि. पु.–१.१८.१०

६७. पद्म पु. ५.१.८०

६८. सर्वानुक्रमणी

६९. प्रलयकालेऽपि सूक्ष्मरूपेण परमात्मनि वेदराशिस्थितिः – (कुल्लुकभट्टः)

७०. नैव वेदाः प्रलीयन्ते महाप्रलयेऽपि

७१. वेदस्य सूक्ष्मरचनवज्जगत्यपि महदाश्चर्यभूतं रचनमीश्वरेण कृतमस्त्यतः । महर्षि दयानन्दः

७२. महत ऋग्वेदादे शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थं विद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। नहीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति । यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवोऽस्ति। यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि सततोऽप्यधिकविज्ञानं इति प्रसिद्धं लोके। (वेदान्तदर्शन शांकरभाष्य १.१.३)

७३. यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
तमिमे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥ (मध्वाचार्यः)

७४. तपस्विनो धृतिमन्तः श्रुतिविज्ञानचाक्षुषः ।
सर्वमार्षं हि मन्यन्ते व्याहतं विदितात्मनः ॥ (महाभारत शा.प. २६८.१०)

७५. युगान्तेऽन्तर्हितान् मन्त्रान् सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा। (मनु. २.१७८)

७६. अथर्व- १०.७.२०

७७. महाभारत शान्ति पर्व - २३२.२४

७८. वैदिक साहित्य एवं संस्कृति - डॉ. कपिलदेव द्विवेदी पृ. ३८

७९. A History of ancient sanskrit literature - 1859

80. History of Indian literature.

81. Indian antiquary 1894. Page . 158

82. History of Indian literatore vol. 1. page. 290-310

८३. एतरेय ब्राह्मण, मार्टिन होग, भूमिका भाग - १ पृ. ४७-४८

८४. It was at this time that the samhitas was probably compiled into systematic books and attempts made to ascertain the meaning, of the oldest hymns and formulas.

(the orion P. 207)

८५. एकं द्वे त्रीणि चत्वारीति वा अन्यानि नक्षत्राणि, अथैत एव भूयिष्ठा यत्कृत्तिका:, तद्द भूमानमेव एतदुपैति तस्मात् कृत्तिकास्वादधीत । एता ह वै प्राच्यै दिशो न च्यवन्ते, सर्वांमि ह वा अन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते । शत. ब्रा. २.१.२.२.३

८६. असूर्या नाम ते लोका अन्धेन तमसाऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ यजु. ४०.३

८७. Rigvedic India

८८. एका चेतत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ॥ (ऋग्. ७.९५.२)

८९. वैदिक सम्पत्ति - रघुनन्दन शर्मा पृ. १३८-१४४

९०. वैदिक वाङ्मय-एक अनुशीलन, - डॉ. ब्रजबिहारी चौबे पृ. १४२

९१. ऋग्वेदादिभाष्यभूमिका, वेदोत्पत्तिविषयः, पृ. ९-२६

९२. निरुक्तम् - यास्काचार्यः

९३. अष्टाध्यायी - १.४.१०९

९४. पदप्रकृतिः संहिता । निरुक्त - १.६.१२

९५. वैदिकसाहित्य का इतिहास, श्री मुसलगाँवकर पृ. ४९

९६. मुण्डक उप. १.१.५

९७. छान्दो. उप. ७.१.२

९८. ऐत. ब्रा. ५.३२

९९. तै. ब्रा. ३.१२.९.१

१००. तत्रैव १.२.१.२६

१०१ ऐत. ब्रा. ५.३३

१०२. मीमांसा दर्शन – २.१.३५

१०३. तत्रैव २.१.३६

१०४. तत्रैव २.१.३७

१०५. ऋग्वेदादि० वेदविषय पृ. २८३

१०६. आश्व. शा. ८.१३.३२

१०७. गो. ब्रा. १.३.२

१०८. तत्रैव २.२४

१०९. ऋग्वेदसर्वानुक्रमणी (षड्गुरुशिष्यः)

११०. तद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् यद् ऋचा तद् दृढम् ।
(तै.सं. ६.५.१०३)

१११. वैदिक साहित्य, रामगोविन्द त्रिपाठी, पृ. ६३–६४

११२. जै. न्या. भा. (२.१.१२)

११३. आप० परि० (३.१)

११४. जै.न्या.भा (२.१.३५.१०)

११५. ऋग्वेदः श्वेतवर्णः स्यात् द्विभूजो रासभाननः ।
अक्षमालायुतः सौम्यः प्रीतश्चाध्ययनोद्यतः । (हेमाद्रिकारः)

११६. वैदिक साहित्य एवं संस्कृति, डॉ. कपिलदेव द्विवेदी पृ. ४७

११७. तत्रैव पृ. ४७-४८

११८. ऋग्वेद - १०.१९१.२

११९. The great majority of teh hymns are invocations and adorations of the gods respectively addressed, their key note is a simple outpouring of the heart, a prayer to the eternals. an invitation to them to accept favourably the gift reverently consecrated. (Life in Ancient India)

१२०. इन्डियन फिलोसोफी, भाग- १, पृ.सं. - ६६

१२१. Maxmuller, History of Ancient Sanskrit Literature P. 18.

१२२. निरुक्त - ७.१२

१२३. पूर्वमीमांसा - २.१.३७

१२४. यजुर्य्योऽयम्पवते: .... तस्माद् वायुरेव यजु: । .... यच्च जूश्च तस्माद्यजुरेष एव । शत. ब्रा. १०.३.५.१-२

१२५. अध्वर्युनामक एक ऋत्विक् यज्ञस्य स्वरूपं निष्पादयति । अध्वरं युनक्ति, अध्वरस्य नेता । (ऋ० भाष्यभूमिका)

१२६. अजास्य पीतवर्ण: स्यात् यजुर्वेदोऽक्षसूत्रधृक् ।
वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रद: ॥

१२७. बुद्धिमालिन्यहेतुत्वाद्यजु: कृष्णमितीर्यते ।
व्यवस्थित प्रकरणाद्यजु: शुक्लमितीर्यते ॥

१२८. (क) व्याकरणमहाभाष्यम् आ. १

(ख) यजुरेकशताध्वकम्। षड्गुरुशिष्य, सर्वानुक्रमणी

(ग) शाखानां तु शतेनाथ यजुर्वेदमथाकरोत्। कूर्म० ४९.५१

१२९. अष्टौ बृहती सहस्त्राणि (८००० x ३६=२, ८८,०००) यजुषाम्। शत० १०.४.२.२८

१३०. यजु० ३४.१.६

१३१. यजु० ३२.८

१३२. यजु० ४०.१

१३३. पूर्वमीमांसा २.१.३६

१३४. ऋग्० - १.६२.२

१३५. बृहदा० उप. १.३.२२

१३६. (क) या ऋक् तत् साम। छान्दो. उप. १.३.४

(ख) ऋचि अध्यूढं साम। छान्दो. उप. १.६.१

१३७. (क) बृह० उप. ६.४.२०

(ख) अथर्व० १४.२.७१

(ग) ऐत०ब्रा० ८.२७

१३८. सर्वेषां वा एष वेदानां रसो यत् साम। शत. ब्रा. १२.८.३.२३, गो. ब्रा. २.५.७

१३९. नासामा यज्ञोऽस्ति। शत. १.४.१.१

१४०. सामानि यो वेत्ति स वेद तत्वम्। बृहद्देवता

१४१. श्रीमद्भगवद्गीता - १०.२२

१४२. ऋचः साम रसः साम्नः उद्गीथो रसः । रसतम : परमः पराध्र्यः – उद्गीथः ।
छा० उ० १.१.२–३

१४३. (क) इन्द्राय साम गायत । ऋग् – ८.९८.१
(ख) इन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । ऋग् – ८.९८.७

१४४. ऋग् – ५.४४.१४

१४५. सामवेदस्य किल सहस्त्रभेदा भवन्ति ।
एष्वनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहता : ॥

१४६. अथर्वाणोऽथर्वणवन्तः । थर्वतिश्चरतिकर्मा तत्प्रतिषेधः । निरुक्त – ११.१८

१४७. अथ अर्वाग् एनं अन्विच्छेति, तद् यद् अब्रवीद् अथार्वाङ्
एनमेतासु अप्सु अन्विच्छेति तदथर्वाऽभवत् ॥ गोपथब्रा. १.४

१४८. ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति । सायण० अथर्वभाष्यभूमिका

१४९. न तिथिर्न नक्षत्रं न ग्रहो न च चन्द्रमा : ।
अथर्वमन्त्रसंप्राप्त्या सर्वसिद्धिर्भविष्यति ॥ अथर्वपरि० २.५

१५०. यस्तत्राथर्वणान् मन्त्रान् जपेत् श्रद्धासमन्वितः ।
तेषामर्थाद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम् ॥ स्क. पु. कमलालय खण्डः

१५१. मैकडानल संस्कृत साहित्य का इतिहास (हि. अनुवाद) पृ. १७२

१५२. तै. सं. भाष्य, सायणाचार्य ।

१५३. ब्रह्म वै मन्त्रः । शत. ७.१.१.५

१५४. ब्रह्म यज्ञः । शत. ३.१.४.१५

१५५. भट्ट भास्कर, तै. सं. भाष्य १.५.१

१५६. नैरुक्त्यं यत्र मन्त्रस्य विनियोगः प्रयोजनम् ।

प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते ॥

१५७. मीमांसासूत्र शाबर भाष्य २.१८

१५८. ऐतरेय ब्रा० पञ्चिका – ७, अध्याय – ३

१५९. उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः ।

कौषितकी ब्राह्मणं च शाखाशांखायनी स्थिता ॥ (चरणव्यूह टी.कं. – २)

१६०. रूद्रो वै ज्येष्ठश्च श्रेष्ठश्च देवानाम् । शांखा० ब्रा० २५.१३

१६१. डॉ. सूर्यकान्त, अथर्ववेद एवं गोपथ ब्राह्मण, भूमिका – पृ० ९

१६२. तैत्ति० आर० भाष्य श्लोक – ६

१६३. आरण्यकं च वेदेभ्यः औषधिभ्योऽमृतं यथा । महा. १.२६५

१६४. कौषीतकि आरण्यकम्

१६५. ऐतरेयारण्यकम्

१६६. वैदिक साहित्य का इतिहास – डॉ. कपिलदेव द्विवेदी, पृ.७८

१६७. निबन्धशतकम् – पृ.–५

१६८. पाणि.शिक्षा, श्लोक ४१.४२

१६९. गोपथ ब्रा. –१.२७

१७०. बौधायन ध.सू. – २.१४२

१७१. गौ.ध.सू. – १५.२८

१७२. रामायण बा.का. ७.१५

१७३. माण्डूक्योपनिषद् १.१.४,५

१७४. तै.उ. २.१ अनु

१७५. पाणि. शि. ३३

१७६. सायण - ऋ.भा.भू.

१७७. तै. उ. - १.१

१७८. महा.भा.प.आ

१७९. निरुक्त- १ अ.

१८०. मुण्डक ३ २ अनुवाक

१८१. शाकलप्रातिशाख्यस्य १४ अ. अन्ते

१८२. प.मा.प. आह्निके

१८३. पाणि. शि. ४१.४२

१८४. महाभाष्य आ. १

१८५. छा.उप.शाङ्करभाष्य

१८६. पाणि. शिक्षा ४१.४२

१८७. निरुक्त ७.३

१८८. पा.शिक्षा ४१.४२

१८९. बृहद्अनुवादचन्द्रिका पृ. -६७२

१९०. पा.शिक्षा ४१.४

१९१. बृहद्अनुवादचन्द्रिका पृ. -६७२

१९२. तै. ब्रा. १.१

१९३. वेदाङ्ग ज्योतिषम् श्लोक १२

१९४. वेदाङ्ग ज्योतिषम् श्लोक ४

१९५. एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ मनु. २.६५

१९६. ऋक्सूक्तसङ्ग्रहः - डॉ. देवेन्द्रनाथ पाण्डेय, पृ. २२

१९७. ऋग्. - १.१२४.३९, अथर्व. ९.१०.१८

१९८. अथर्व. १०.८.४३

१९९. तदेव - १०.८.४४

२००. आपश्यति प्रतिपश्यति परापश्यति पश्यति ।
दिवमन्तरिक्षमाद् भूमिं सर्वं तद् देवि पश्यति ॥ तदेव - ४.२०.१

२०१. येन देवा न वियन्ति नो च विद्विषते मिथः ।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥ तदेव - ३.३०.४

२०२. वैदिक साहित्य एवं संस्कृति–कपिलदेव द्विवेदी, पृ.८७

*****

ISBN - 13 - 078-81-925721-0-9

Shree Somnath Sanskrit University - Veraval.

Veraval- 362 266, Dist : Junagadh (Guj.) India

Phone : 02876 - 244528, 29, 32 Fax : 244417

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info